চক্রস্থ। ওঁ আক্রন্দেনেতি দর্পণস্থ। ওঁ মা নো নয়েষু তিগ্মং [illegible]শিশ্বস্থ বয়াথা দ্রবন্তাং। আয়ঃ শয্যাভিস্তুবিনিম্নোঽস্থাং শ্রীনিতা দিশঙ্গভস্থৌ। ইতি ঘণ্টায়াঃ। ততো গায়ত্রীং ওঁ ঋতঞ্চ সত্যঞ্চাভিদ্যাত্তপসোধ্যজায়তেত্যাদি চ পঠেৎ। ততো যূপং প্রক্ষাল্য যথা-বিধিঃ সংপূজ্য একহস্তমিতে গর্ত্তে আরোপ্য। ওঁ যূপব্রস্কায় উতয়ে যূপবাহাশ্বশালং। যেঽশ্বযূপায় তক্ষতি যে চার্ব্বতে পচনং সম্ভবন্তুতো তেষামভিগুর্ত্তিং ন ঈন্দতু। ইতি বৃষং সংবোধ্য। ওঁ স্থিরো ভবেতি স্থিরীকৃত্য মৃত্তিঃ পূরয়িত্বা তত্রৈব বৃষং বধ্নীয়াৎ। অস্য চতুর্দ্দিক্ষু উপযূপ চতুষ্টয়ং স্থাপয়িত্বা বৎসতরীচতুষ্টয়ং বধ্নীয়াৎ॥ ততঃ কৃতাঞ্জলি র্যজমানঃ। ওঁ ইড়াসি কাম্যাসি রন্তাসি সরস্বত্যসি মহসি শ্রুতিরসীতি মন্ত্রং পঠন্ বৎসতরীচতুষ্টয়সহিতং বৃষং প্রদক্ষিণং কুর্য্যাৎ। ততো বৃষস্য দক্ষিণকর্ণে প্রজাপতি-ঋষিঃ পঙ্ক্তিচ্ছন্দো বৃষোদেবতা বৃষসূক্তজপে বিনিয়োগঃ। ওঁ ঋষভং মাসমানানাং বিসাসহিং। হন্তারং শত্রূণাং কৃধি বি-রাজং গোপতিং গবাং। অহমস্মি সপত্নহেন্দ্র ইবাক্লুষ্টোঽক্ষত। অধঃ সপত্নামেপদোবিগ সর্ব্বেঽধিতিষ্ঠতা। অত্রৈব বোপনহস্য আত্নীভে ইবেজ্যয়া। বাস্তোম্পতে নিষেধেয়ান্যথা সদধস্বদানঃ। অভিদূরহমাগমং বিশ্বকর্ম্মণে ধাম্না। আরশ্চিত্ত মারোহত মারোহং সমিধন্দধে। যোগক্ষেমং য আদাহং ভূয়াসমুত্তমমারোমূর্দ্ধান মক্রমীৎ। অউম্পদাম উদ্বদতমকণ্ডূকা ইবোদকাম্মণ্ডূকা উদকাদ্রিব॥ ইতি বৃষসূক্তং॥ ততো বৎসতরীচতুষ্টয় সহিতং বৃষং পাদ্যাদিভিরভ্যর্চ্চ্য ওঁ পিতা বৎসানাং পতিরঘ্নানাং মথো-পিতা মহতাং গর্গরাণাং। গর্ভোজরায়ুঃ প্রতিধুক্পীযূষ আমিক্ষা ঘৃতংত্বস্য রেতঃ। ওঁ বৃষোসি ভগবান্ ধর্ম্মশ্চতুষ্পাদঃ প্রকী-র্ত্তিতঃ। বৃণোমি তমহং ভক্ত্যা স মাং রক্ষতু সর্ব্বতঃ॥ ইতি পঠেৎ। ততস্তিলকুশজলান্যাদায় ওঁ অদ্যেত্যাদি অমুকগোত্রস্য 

য়ুবি। অপাবনীকে সমিধেয় আভূতস্তমস্যাম মধূমন্ত উর্ম্মি স্বাহা॥ ইদমন্ত্যঃ। ততো বন্ধুঃ সুবন্ধুঃ শ্রুতবন্ধুর্ব্বিশ্ববন্ধুর্গোপায়না ঋষয়ো বিরাট্ছন্দো হগ্নির্দ্দেবতা হগ্ন্যুপস্থাপনে বিনিয়োগঃ। ওঁ চমেশ্বরশ্চ মে যজ্ঞোপ চ তে মনশ্চ যাত্ত ন্যূনং তস্মৈ তদুপপত্তেহরিক্তং তস্মৈ তে নমঃ। ওঁ যজ্ঞং যজ্ঞপতিং গচ্ছ স্বাং যোনিং গচ্ছ স্বাহা। এষতে যজ্ঞো যজ্ঞপতে সহসূক্তয়া কেসু ধীরং জুষস্ব স্বাহা। ইত্যুত্থায়াগ্নিমুপস্থায়॥ ওঁ শ্রদ্ধাং মেধাং যশঃ প্রজ্ঞাং বিদ্যাং বুদ্ধিং শ্রিয়ং বলং। আয়ুষ্যং তেজশ্চারোগ্যং দেহি মে হব্যবাহন। ইতি প্রণমেৎ। ততঃ স্থালীপাকস্থ ঘৃতেন সর্ব্বান্ পরিস্তরণকুশান্ ওঁ সর্ব্বেভ্যঃ স্বাহেতি জুহুয়াৎ। ততোহগ্নেঃ সকাশাৎ শ্রুবাগ্রেণ ভস্মমানীয় অঙ্গুষ্ঠানামিকাভ্যাং গৃহীত্বা। কুৎসঋষির্জ্জগতীচ্ছন্দো রুদ্রোদেবতা রক্ষাকরণে বিনিয়োগঃ। ওঁ মা নস্তোকে তনয়ে মা ন আয়ো মা নোহশ্বেষু রীরিষঃ। বীরন্মা নো রুদ্র ভামিনো বর্হিষবিয়ন্তঃ সদমিত্ত্বাহবামহে। ইতি মন্ত্রেণ তদভিমন্ত্র্য॥ ওঁ ত্র্যায়ুষং যমদগ্নেঃ ইতি ললাটে কশ্যপস্য ত্র্যায়ুষমিতি হৃদি। ওঁ অগস্ত্যস্য ত্র্যায়ুষমিতি বাহুমূলয়োঃ। যদ্দেবানাং ত্র্যায়ুষমিতি কণ্ঠমূলে। তন্নোহস্তু ত্র্যায়ুষমিতি ব্রহ্মরন্ধ্রে দদ্যাৎ। ততোহগ্নিং বিসর্জ্জয়েৎ॥ অত্রিতঋষির্গায়ত্রীচ্ছন্দো হগ্নির্দ্দেবতা হগ্নিবিসর্জ্জনে বিনিয়োগঃ। ওঁ অভ্যাবমিতদ্রয়ো নিষিক্তং পুস্করে মধু অবতস্য বিসর্জ্জনে। ততো দক্ষিণাং দদ্যাৎ। ব্রাহ্মণে পূর্ণপাত্রং গুরুবে কাংস্যাধারবস্ত্রযুগ্ম গোহিরণ্যানি তন্মূল্যং বা দদ্যাৎ। বৃষোৎসর্গ প্রতিষ্ঠার্থং উৎসৃষ্ট বৃষতুল্য বৃষং তন্মূল্যং বা আচার্য্যায় দদ্যাৎ। ততো গচ্ছধ্বমমরাঃ সর্ব্বে গৃহীত্বার্চ্চাং স্বমালয়ং সন্তুষ্টা বরমস্মাকং দত্ত্বেদানীং সুপূজিতাঃ। ইতি দেবান্ বিসৃজ্য॥ ওঁ প্রীয়তাং পুণ্ডরীকাক্ষঃ সর্ব্ব যজ্ঞেশ্বরো হরি স্তস্মিংস্তুষ্টে জগৎ তুষ্টং

প্রীণিতে প্রীণিতং জগৎ। ইতি পঠেৎ। ওঁ সম্মলীত্যাদিনা শান্তিং কৃত্বা অছিদ্রং কুর্য্যাৎ॥ ততো হ্যদ্যেত্যাদি এতৎ সোপকরণ বৎসতরীচতুষ্টয়সহিত বৃষোৎসর্গ কর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় শ্রীবিষ্ণুস্মরণমহং করিষ্যে। ইতি সংকল্প্য ওঁ তদ্বিষ্ণোরিত্যাদিনা বিষ্ণুং স্মরেৎ॥ * ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি কালেসি ভট্টাচার্য্যকৃত ঋগ্বেদিনাং বৃষোৎসর্গ প্রয়োগঃ সমাপ্তঃ ॥ * ॥

অথ ঋগ্বেদিনাং সাংবৎসরিক শ্রাদ্ধপ্রয়োগঃ। তিলতৈলেন দীপং প্রজ্বাল্য প্রথমং ভোজ্যমুৎসৃজেৎ। ততো বাস্তুপুরুষায় নম ইত্যনেন বাস্তুং সংপূজ্য। ওঁ তদ্বিষ্ণুরিতি স্মৃত্বা ততো যজ্ঞেশ্বরং পূজয়েৎ। যথা এতৎ পাদ্যং ওঁ যজ্ঞেশ্বরায় শ্রী বিষ্ণবে নমঃ। এবমর্ঘ্যমাচমনীয়াদীনি দদ্যাৎ। পিতৃরীত্যা ইদমন্নমেতদ্ভূস্বামি পিতৃভ্যঃ স্বধা নমঃ। পূর্ব্বমুখেন স্নাত্বা দক্ষিণামুখঃ প্রাচীনাবীতী দর্ভবটুং স্থাপয়েৎ। ততো বাক্যং কুর্য্যাৎ। বিষ্ণুরোং তৎসদদ্যামুকে মাস্যমুকে পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণ একোদ্দিষ্টবিধিক সাম্বৎসরিক শ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে। ওঁ কুরুষ্বেতি ব্রাহ্মণঃ। উপবীতী গায়ত্রীং দেবতাভ্য ইত্যাদি চ ত্রিঃ পঠিত্বা পুণ্ডরীকাক্ষঞ্চ স্মৃত্বা মন্ত্রজলেন শ্রাদ্ধীয় দ্রব্যপ্রোক্ষণং কর্ত্তব্যং রক্ষার্থ মুদকপাত্রমেকদেশে স্থাপয়েৎ। ততস্তিলহস্তঃ ওঁ অঙ্গুষ্ঠমাত্রপুরুষ ইমাং পর্য্যটতে মহীং। অসুরাণাং বধার্থায় ভূমৌ সংস্থাপিতো ময়া। অনাদিনিধন জ্ঞান নিত্যানন্দ জনার্দ্দন। মমাত্র শ্রাদ্ধে কর্ত্তব্যে সন্নিধী ভব কেশব। ইতি রক্ষোঘ্নসূক্তং জপেৎ। প্রাচীনাবীতী বিষ্ণুরমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে দর্ভাসনং স্বধা নমঃ। ইতি দর্ভাসনং ব্রাহ্মণদক্ষিণপার্শ্বে দদ্যাৎ। ব্রাহ্মণাগ্র ভূমিমাসিচ্য কুশানাস্তীর্য্য তেষু সতিল পাত্রমুত্তানীকৃত্য ওঁ পবিত্রাসি বৈষ্ণবীত্যনখচ্ছিন্নং ওঁ বিষ্ণুর্মনসা পূতমসীতি জলসংসর্গং কৃত্বা দ্রোণ্যুপরি পবিত্রং স্থাপয়েৎ। ততো জলেন ওঁ শন্নো দেবী রভিষ্টয়ে আপো ভবন্তু পীতয়ে। সংযো রভিস্রবন্তু নঃ। ইতি স্নাপয়েৎ। তত স্তিলান্ গৃহীত্বা ওঁ তিলোসি সোম দেবত্যো গোসবো দেবনির্ম্মিতঃ। প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা নমঃ। ইতি তিলান্ বিকীর্য্য তূষ্ণীং গন্ধপুষ্পে দত্ত্বা কুশান্তরেণাচ্ছাদ্য ওঁ পিতৃপাত্রং সম্পন্নমিত্যভিমৃশ্য

উপবীতী দক্ষিণামুখঃ ওঁ স্বধার্ঘ্যং ইতি ব্রাহ্মণেঽর্ঘ্যং নিবেদ্য অন্য জলং দত্বা বিষ্ণুরোমমুক গোত্র পিতরমুক দেবশর্ম্মন্নি
দত্তে ঽর্ঘ্যং স্বধা নমঃ। ইত্যুৎসৃজ্য বামহস্ততলে দ্রোণীং নিধায় দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সা সং বভুবুর্যা।
অন্তরীক্ষা উত পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ শং স্যোনাঃ সুহবা ভবন্তু। ততো বামে ন্যুব্জং কুর্য্যাৎ। ওঁ পিত্রে
স্থান মসীত্যনেন ততো দক্ষিণস্কন্ধে উত্তরীয়ং দত্বা দ্রোণ্যাং গন্ধাদীন্যাদায় ব্রাহ্মণে জলগণ্ডূষং দত্বা গন্ধাদীনি সমর্জ্জীকৃত্য
বাক্যং কুর্য্যাৎ। বিষ্ণুঃ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতানি গন্ধপুষ্প ধূপদীপ যজ্ঞোপবীতাচ্ছাদনানি স্বধা নমঃ। ইত্যুৎ-
সৃজ্য প্রত্যেকং দ্রব্যং দর্শয়েৎ। ওঁ এষ তে গন্ধঃ। ওঁ এতত্তে পুষ্পং। ওঁ এষ তে ধূপঃ। ওঁ এষ তে দীপঃ। ওঁ এতত্তে
যজ্ঞোপবীতং। ওঁ এতত্তে আচ্ছাদনং। ততঃ ওঁ পিত্রর্চ্চনং সম্পূর্ণং জাতং ইতি প্রার্থয়েৎ ওঁ সম্পূর্ণং জাতমিতি ব্রাহ্মণঃ। ৫০৭
ততো ব্রাহ্মণাগ্রতো নৈর্ঋতাদি ক্রমেণ দক্ষিণাগ্রং চতুষ্কোণ মণ্ডলং কৃত্বা তদুপরি ভোজনপাত্রং পাতয়িত্বা ব্রাহ্মণদক্ষিণে একাং
দ্রোণীং জলপূর্ণাং সংস্থাপ্য তত্র জুহুয়াৎ। ওঁ অমুক গোত্রায় পিত্রে হমুকায় স্বাহা। ইতি হুত্বা সর্ব্বমন্নব্যঞ্জনাদিকং পরিবেশ-
য়েৎ। ব্রাহ্মণদক্ষিণে জল মন্যদ্বামভাগে দদ্যাৎ। তত উত্তান হস্তাভ্যাং পাত্রং স্পৃষ্ট্বা ওঁ পৃথিবী তে পাত্রং দ্যৌঃ পিধানং ব্রাহ্মণস্য
মুখে হমৃতেঽমৃতং জুহোমি ব্রাহ্মণানাং প্রাণাপানয়োর্জুহোম্যক্ষিতমসি মৈনং ক্ষেষ্ঠা সুত্রামস্মিন্ লোকে। ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা
নিদধে পদং সমূঢ়মস্য পাংশুলে। ইত্যানযাঙ্গুষ্ঠং নিবেশয়েৎ। ততো বামহস্তেন পাত্রং স্পৃষ্ট্বা দক্ষিণহস্তেন ওঁ বিষ্ণো কব্যং
রক্ষস্ব ইতি জলেনান্নমভ্যুক্ষ্য ওঁ অপহতেতি তিলান্ বিকীর্য্য বিষ্ণুরোম্ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নিদত্তেঽন্নং সোপকরণং

সজলং স্বধা নমঃ। ইত্যুৎসৃজ্য বামস্কন্ধে উত্তরীয়ং দত্ত্বা গায়ত্রীং ত্রিঃ সকৃদ্বা জপিত্বা দক্ষিণ স্কন্ধে উত্তরীয়ং দত্ত্বা ওঁ মধুবাতা
ঋতায়তে মধুক্ষরন্তি সিন্ধবঃ মাধ্বীর্নঃ সন্ত্বোষধীর্মধুনক্ত মুতোষসোঃ। মধুমৎপার্থিবং রজঃ মধুদ্যৌরস্তু নঃ পিতা মধুমান্নো বন-
স্পতির্ম্মধুমাংস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ। ওঁ মধু মধু মধ্বিতি জপেৎ। ততঃ শ্রাব্যং পঠেৎ। ওঁ অন্নহীনং ক্রিয়াহীনং বিধি-
হীনঞ্চ যদ্ভবেৎ তৎসর্ব্বমচ্ছিদ্রমস্তু। ইতি পঠিত্বাঞ্জলিং বদ্ধ্বা ওঁ ইদমন্নং ইমা আপ ইদং হবিঃ। এতান্যুপকরণানি। ইতি দ্রব্যং
দর্শয়িত্বা ওঁ ভগবান্ প্রাশয়তু ইতি ব্রাহ্মণায় জলগণ্ডূষং দদ্যাৎ। ওঁ যথাসুখং জুষস্ব ইতি ব্রাহ্মণো বদেৎ। ততঃ পুনর্গায়ত্রীং
মধুবাতেতি চ ত্রিঃ পঠেৎ প্রাগুক্ত রক্ষোঘ্ন সূক্ত রুচিস্তবাদিকমপি। ওঁ সপ্তব্যাধা দশার্ণেষু মৃগাঃ কালঞ্জরে গিরৌ চক্রবাকাঃ সর-
দ্বীপে হংসাঃ সরসি মানসে। তেপি জাতাঃ কুরুক্ষেত্রে ব্রাহ্মণা বেদপারগাঃ। প্রস্থিতা দূরমধ্বানং যূয়ং তেভ্যো হবসীদত। ওঁ দুর্য্যো- 
ধনো মন্যুময়ো মহাদ্রুমঃ স্কন্ধঃ কর্ণঃ শকুনি স্তস্য শাখা। দুঃশাসনঃ পুষ্পফলে সমৃদ্ধে মূলং রাজা ধৃতরাষ্ট্রো হমনীষী॥ ওঁ যুধি-
ষ্ঠিরো ধর্ম্মময়ো মহাদ্রুমঃ স্কন্ধোঽর্জ্জুনো ভীমসেনোঽস্য শাখা। মাদ্রীসুতৌ পুষ্পফলে সমৃদ্ধে মূলং কৃষ্ণো ব্রহ্মচ ব্রাহ্মণাশ্চ॥
ওঁ ঈশানবিষ্ণুকমলাসনকার্ত্তিকেয় বহ্নিত্রয়ার্করজনীশধনেশ্বরাণাং ক্রৌঞ্চামরেন্দ্রকলসোদ্ভবকাশ্যপানাং। পাদান্নমামি সততং
পিতৃমুক্তিহেতুন্। ইতি পঠিত্বা ওঁ তৃপ্তাঃ স্থ ইতি ব্রাহ্মণায় জলগণ্ডূষং দদ্যাৎ। ওঁ তৃপ্তাঃ স্ম ইতি ব্রাহ্মণো বদেৎ। ততো
ওঁ মধুবাতেতি মধু মধু মধ্বিতি চ। ওঁ অক্ষন্নমী মদন্ত হব প্রিয়া অধূষত অস্তোষত সভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যান্বিন্দ্রতে
হরী। ইতি পঠেৎ। ওঁ সম্পন্নমিতি পৃচ্ছেৎ। ওঁ সুসম্পন্নমিতি ব্রাহ্মণঃ। ততঃ পূর্ব্বস্থাপিত হুতশেষান্ন পিণ্ডার্থং প্রচুর

মাসাদ্য স্বল্পং বিকীরণার্থং পৃথক্ স্থাপয়েৎ। ততঃ ওঁ শেষমন্নং ক্ব দেয়মিতি পৃচ্ছেৎ। ওঁ ইষ্টেভ্যো যথাসুখং বিনিযুজ্যতামিতি ব্রাহ্মণঃ। ততো ব্রাহ্মণায় জলগণ্ডূষং দদ্যাৎ। ততঃ ওঁ পিণ্ডদানমহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি ব্রাহ্মণো বদেৎ। ততো বামস্কন্ধে উত্তরীয়ং দত্ত্বা প্রাঙ্মুখঃ গায়ত্রীং জপ্ত্বা ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চেতি ত্রির্জপেৎ। ততো দক্ষিণ স্কন্ধে উত্তরীয়ং দত্ত্বা দক্ষিণামুখ ঈশান কোণাদারভ্য দক্ষিণাদিক্রমেণ চতুষ্কোণমণ্ডলং কৃত্বা ওঁ অপহতেতি রেখাং জলৈরভ্যুক্ষ্য তদুপরি কুশানাস্তীর্য্য ওঁ সুন্ধন্তাং পিতর ইতি তিলজলানি কুশোপরি দদ্যাৎ। ততঃ পূর্ব্বস্থাপিত হুতাবশেষমন্যান্নেন ওঁ অক্ষন্নমী মদন্ত ইত্যাদি ওঁ মধুবাতেতি চ মন্ত্রেণ সুবর্ত্তুলং বিলোপমং পিণ্ডং নির্ম্মায় পিণ্ডনির্ম্মাণে মন্ত্রস্তু ন সূত্রকারসম্মতঃ। তিলজল দ্বিগুণ ভগ্ন কুশত্রয়সহিতং পিণ্ডং গৃহীত্বা পিতৃতীর্থেন ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেষ তে পিণ্ডো যে চাত্র ত্বামনুষাংশ্চ ত্বমনু তস্মৈ তে স্বধা নমঃ। ইতি তিলাম্বুসিক্তে দেশে দর্ভোপরি দদ্যাৎ। ততো রমন্ত্রকং করং দর্ভমূলে নিম্রব্য জলং স্পৃষ্ট্বা কৃতাঞ্জলিঃ। ওঁ অত্র পিতর্মাদয়স্ব ইতি পিণ্ডমনুমন্ত্র্য উদঙ্মুখো ভূত্বা যথাশক্তি প্রণান্ সংযম্য পরাবৃত্য ওঁ অমী মদৎ পিতা যথাভাগমাবৃষা ইষ্ট ইত্যনেন শ্বাসং ত্যজেৎ। উপবীতী পিণ্ডশেষমাঘ্রায় হস্তৌ প্রক্ষাল্যাচম্য প্রাচীনাবীতী দক্ষিণামুখঃ পাতিতবামজানুঃ ওঁ সুন্ধন্তাং পিতর ইতি পিণ্ডোপরি তিলাম্বু দদ্যাৎ। ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নভ্যংক্ষব ইতি পিণ্ডোপরি ঘৃতং তিলতৈলম্বা দদ্যাৎ। ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নভ্যংক্ষব ইত্যঞ্জনং পিণ্ডোপরি দদ্যাৎ। ততো নবমনবম্বা শুক্লবস্ত্র দশাভবং সূত্রং বামহস্তাদ্দক্ষিণহস্তেন সংগৃহ্য ওঁ এতদ্বঃ পিতরো বাসো মা নাতো অন্যৎ পিতরো যুঙ্ধ্বমিতি

অথ ঋগ্বেদিনাং পার্ব্বণশ্রাদ্ধপ্রয়োগঃ ॥ * ॥ তত্র পূর্ব্বদিনে নিরামিষৈকভক্তঃ স্বকর্ত্তব্যানিশ্চয়েপি তদ্বিহিত্যা। ততঃ পর-
দিনে কৃতদেবপূজান্তক্রিয়ো দক্ষিণপ্লবনে দক্ষিণাভিমুখী ভূয় কৃতপাদশৌচো দর্ভহস্তঃ প্রাঙ্মুখ উদঙ্মুখো বা দ্বিরাচম্য কুশ-
হস্তঃ শর্করাস্থ্যাদিযুক্তাং পঙ্কিলাং স্রবজ্জলাং কৃমিযুতাং দুর্গন্ধামনিষ্টশব্দাং ভূমিং ত্যক্ত্বা উপলিপ্তায়াং ভূমৌ দর্ভাসনে উপবিশ্য
তিলতৈলেন দীপং প্রজ্বাল্য ভোজ্যোৎসর্গং কুর্য্যাৎ। ততঃ ওঁ বাস্তুপুরুষায় নমঃ ইতি বাস্তুপুরুষং সংপূজ্য ওঁ তদ্বিষ্ণোরিতি
বিষ্ণুং স্মৃত্বা। ওঁ তৎসদিতুচ্চার্য্য যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং তস্মৈ দত্ত্বা পরকীয় ভুমৌ চেৎ তৎসামিনে মূল্যং
অথবা পিতৃরীত্যা ইদমন্নং এতৎ ভুস্বামি পিতৃভ্যঃ স্বধেতি দদ্যাৎ। এতচ্চ স্বভুমৌ অস্বামিকায়াঞ্চ ন দদ্যাৎ। ততঃ সর্ব্বং
দেবকৃত্যং উত্তরামুখঃ পাতিত দক্ষিণজানুরুপবীতী কুর্য্যাৎ। সর্ব্বঞ্চ পিতৃকৃত্যং অর্ঘদানবর্জ্জ্যং পিতৃকৃত্যং দক্ষিণামুখঃ প্রাচী- ৫১২
নাবীতী পাতিত বামজানুঃ সর্ব্বং কুর্য্যাৎ দৈবে প্রাঙ্মুখঃ দ্বিদর্ভযুক্ত যবোদক প্রোক্ষিতমাসনং। পৈত্রে দক্ষিণাগ্রৈক দর্ভ-
যুক্ত তিলোদক প্রোক্ষিতমাসনদ্বয়ং দক্ষিণাদিযূপকল্প্য প্রণবোচ্চারণ পূর্ব্বকং সার্দ্ধদ্বিতয় বেষ্টনযুক্তোর্দ্ধকেশ সপ্তপঞ্চান্যতম
নির্ম্মিতং ব্রাহ্মণবটুত্রয়ং। দৈবে পশ্চিমাগ্রত্বেন প্রাঙ্মুখং। এবং মাতামহ সম্বন্ধিনং॥ দৈবে পিতৃমাতামহাসনেষু নিধায়
দৈবে জলগণ্ডূষং দত্ত্বা ওঁ অদ্যামুকে মাসি অমুকে পক্ষে ঽমুকতিথৌ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ঽমুক গোত্রস্য
পিতামহস্যামুক দেবশর্ম্মণো ঽমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণো ঽমুক গোত্রস্য মাতামহস্যামুক দেবশর্ম্মণো ঽমুক
গোত্রস্য প্রমাতামহস্যামুক দেবশর্ম্মণো ঽমুক গোত্রস্য বৃদ্ধপ্রমাতামহস্যামুক দেবশর্ম্মণঃ পার্ব্বণশ্রাদ্ধে কর্ত্তব্যে পুরূরবোমাদ্র বসো-

র্ব্বিশেষাং দেবানাং পার্ব্বণশ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনং। পর্ব্বেতরে পার্ব্বণ বিধিনা শ্রাদ্ধমিত্যেবং যোজ্যং। ততো দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী। ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণ এবং পিতামহস্য প্রপিতামহস্যামুক দেবশর্ম্মণো ঽমুক নিমিত্তকং পার্ব্বণ শ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনং। ততো মাতামহাদি পক্ষে। ওঁ অদ্যেত্যাদি অমুক গোত্রস্য মাতামহস্যামুক দেবশর্ম্মণ এবং প্রমাতামহস্য বৃদ্ধপ্রমাতামহস্যামুক দেবশর্ম্মণো ঽমুক নিমিত্তকং পার্ব্বণশ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে। ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনং তত উপবীতী সপ্রণব ব্যাহৃতিকাং গায়ত্রীং জপেৎ। দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগীভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব নমো নমঃ ইতি ত্রিঃ পঠেৎ। তত পুণ্ডরীকাক্ষং স্মৃত্বা মৃজ্জলেন শ্রাদ্ধীয় ৫১০
দ্রব্যং প্রোক্ষণং রক্ষার্থমুদকপাত্র মেকদেশে স্থাপয়েৎ। ততঃ প্রাচীনাবীতী তিলহস্তঃ। ওঁ অসুরা রক্ষাংসি পিশাচাঃ প্রেক্ষয়ন্তী পৃথিবীমনু। অন্যত্র তে গচ্ছন্তু যত্রৈষাং গতিঃ নমঃ। ইতি সর্ব্ব তিলান্ বিকীর্য্য। ওঁ অঙ্গুষ্ঠমাত্রঃ পুরুষ ইমাং পর্য্যটতে মহীং। অসুরাণাং বধার্থায় ভূমৌ সংস্থাপিতো ময়া। অনাদিনিধনজ্ঞান নিত্যানন্দজনার্দ্দন। ময়াত্র শ্রাদ্ধে কর্ত্তব্যে সন্নিধী ভব কেশব। ওঁ রক্ষোঘ্নমসি ইতি পঠেৎ। তত উত্তরামুখঃ দেব ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা। ওঁ পুরূরবো মাদ্রবসৌ বিশ্বেদেবা ইদং বো দর্ভাসনং স্বাহা। ইতি ঋজুদর্ভাসনং যবোদকং দেবব্রাহ্মণ দক্ষিণপার্শ্বে দদ্যাৎ। তত আপো দত্ত্বা এবং সর্ব্বোপচারেষু আদ্যন্তয়োরাপো দদ্যাৎ। অথাভ্যুক্ষিতায়াং ভুবি উদগগ্রান্ কুশানাস্তীর্য্য তেষু ন্যখিলং পাত্রমাসাদ্য উত্তানীকৃত্য তস্মিন

ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ ইত্যনেনখচ্ছিন্নং। ওঁ বিষ্ণুর্ম্মনসা পূতেস্থ ইত্যনেন প্রোক্ষিতং পবিত্রং বিন্যস্যাপ আসিচ্য ওঁ শন্নো
দেবীরভিষ্টয়ে ইত্যনেন স্নাপয়িত্বা ওঁ যবোসি ধান্যরাজোসি বারুণো মধুসংযুতঃ নির্ণোদঃ সর্ব্বপাপানাং পবিত্রম্বিভিঃ স্মৃতং।
ইত্যনেন যবান্ বিকীর্য্য তুষ্ণীং গন্ধপুষ্পে চ দত্ত্বা ওঁ দেবপাত্রং সম্পন্নং সুসম্পন্নমিতি ব্রাহ্মণেনোক্তে যবান্ গৃহীত্বা ওঁ
বিশ্বান্ দেবানাবাহয়িষ্যে আবাহয়েত্যনুজ্ঞাতঃ। ওঁ বিশ্বেদেবা স আগতঃ শৃণু তা ম ইমং হবং এদং বর্হির্নিষীদত। ওঁ
বিশ্বেদেবা শৃণুতেমং হবমিত্যাদি। ওঁ ওষধয়ঃ সমবদন্তঃ সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং রাজন্ পারয়ামসীতি
কৃতাঞ্জলির্জ্জপেৎ। ততঃ ওঁ বিশ্বায়াং দক্ষকন্যায়াং জাতা ধর্ম্মা মহাত্মনঃ। বিশ্বেদেবা ইতি খ্যাতা দেবপর্য্যা মহাবলাঃ। শক্রেণ
সহ যোদ্ধৃণাং বিজেতারশ্চ রাক্ষসাং। যন্নামস্মরণাদেব প্রদ্রবন্ত্যসুরাঃ ক্ষণাৎ। বাণবাণাসনধরা দ্বিভুজাঃ শ্বেতবাসসঃ। কেয়ু- ৫১৪
রিণঃ কুণ্ডলিনঃ কিরীটকটকান্বিতাঃ। সৌর্য্যসৌন্দর্য্যসংযুক্তা দিব্যশ্রগনুলেপনাঃ। ইন্দ্রস্যানুচরাঃ সর্ব্বে গোপ্তারস্ত্রিদিরিস্য তে
ইতি বিশ্বান্দেবান্ ধ্যাত্বা ও আগচ্ছন্তু মহাভাগা বিশ্বে দেবা বরপ্রদাঃ। যে হত্র বিহিতপ শ্রাদ্ধে সাবধানা ভবন্তু তে
ইত্যুপস্থায় জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ ওঁ শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ। ইতি সংপূজ্য স্বাহা অর্ঘ্যা ইতি-
অর্ঘং সঙ্কল্পিবেদ্য অন্যাপো দত্ত্বা বামহস্তে অর্ঘ্যপাত্র মাদায় দক্ষিণহস্তেনাস্থাদ্য ওঁ পুরূরবো মাদ্রবসৌ বিশ্বেদেবা ইদং
বো হর্ঘ্যং স্বাহা ইতি দত্ত্বা ওঁ যা দিব্যা আপঃ পৃথিবী সংবভূবুর্যা অন্তরীক্ষা উত পার্থিবীর্য্যা। হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ
শিবাঃ সংস্যোনাঃ সুহবা ভবন্তু। ইতি পঠেৎ। ততো গন্ধাদীন্যাদায় ওঁ পুরূরবো মাদ্রবসো বিশ্বেদেবা এতানি বো গন্ধপুষ্প ধূপ

দীপাচ্ছাদনানি স্বাহা। ইত্যুৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপ এষ বো দীপ এতদ্বঃ আচ্ছাদনং। ইত্যনেন প্রত্যেকং গন্ধাদীনি প্রতিপাদয়েৎ। তত ওঁ বিশ্বেদেবার্চ্চনং সম্পূর্ণং জাতমিতি পৃচ্ছেৎ। ওঁ সম্পূর্ণং জাতমিতি প্রতিবচনং। ওঁ পিত্রর্চ্চনমহং করিষ্যে ওঁ কুরুষ্বেত্যনুজ্ঞাতঃ। ততঃ পিত্রর্চ্চনং কুর্য্যাৎ। দক্ষিণামুখঃ পাতিত বামজানুঃ প্রাচীনাবীতী ব্রাহ্মণে জলং দত্ত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্ এবং পিতামহ প্রপিতামহামুক দেবশর্ম্মন্নিদন্তে দর্ভাসনং স্বধা নমঃ। ইত্যাসনমুৎসৃজ্য তিলোদকেন মোটকং পিতৃব্রাহ্মণবামপার্শ্বে দদ্যাৎ। ততো মাতামহপক্ষে জলং দত্ত্বা ওঁ অমুক গোত্র মাতামহামুক দেবশর্ম্মন্ এবং প্রমাতামহ বৃদ্ধপ্রমাতামহামুক দেবশর্ম্মন্নিদন্তে দর্ভাসনং স্বধা নমঃ। মোটকং তিলোদকেন ব্রাহ্মণবামপার্শ্বে দদ্যাৎ। ততঃ পিতৃপক্ষে ব্রাহ্মণাগ্র প্রোক্ষিতায়াং ভুবি দক্ষিণাগ্রান্ দর্ভানাস্তীর্য্য এবং মাতামহপক্ষেঽপি দর্ভাসনাস্তীর্য্য তেষু ত্রীণ্যর্ঘ্যপাত্রাণি পিতামহপক্ষেপি ন্যখিলানি ত্রীণি পাত্রাণি উত্তানী কৃত্য ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ ইত্যনেনানখচ্ছিন্নং ওঁ বিষ্ণোর্মনসা পূতে স্থ ইত্যনেন প্রোক্ষিতং পবিত্রমেকৈকস্মিন্ পাত্রে একৈকং বিন্যস্য পাত্রেষু তুষ্ণীমাসিচ্য ওঁ শন্নোদেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভি শ্রবন্তু নঃ। ইতি সকৃদনুমন্ত্র্য ওঁ তিলোসি সোমদেবত্যো গোষবো দেবনির্ম্মিতঃ। প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বধা নমঃ। ইতি পিতৃপাত্রে মন্ত্রাবৃত্তিষু তিলান্ দত্ত্বা গন্ধাদীনি চ ক্ষিপ্ত্বা ওঁ পিতৃপাত্রং সম্পন্নং ইত্যভিমৃষ্য তিলহস্তঃ ওঁ পিতৄনাবাহয়িষ্যে ইতি পৃচ্ছেৎ। ওঁ আবাহয় ইত্যনুজ্ঞাতঃ। ওঁ উষন্তস্ত্বেতি তিলান্ বিকীর্য্য ওঁ আয়ান্তু নঃ পিতর ইত্যাদি পঠিত্বা ওঁ শুক্লাম্বরাঃ শুক্লগন্ধাঃ শুক্লযজ্ঞোপবীতিনঃ। আত্মনোঽভি

মুখাসীনা জ্ঞানমুদ্রা নিরায়ুধা ইতি বসুরুদ্রাদিত্যরূপতয়া ধাত্বা ওঁ স্বধা হর্ঘ্যা ইতি পবিত্রং নিবেদ্য অন্যাপো দত্বা অর্ঘ্যমাদায় ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নিদন্তে হর্ঘ্যং স্বধা নমঃ। ইত্যুৎসৃজ্য ব্রাহ্মণে দত্বা ওঁ যা দিব্যা ইত্যনুমন্ত্র্য সংশ্রবসহিতং পাত্রং তথৈব স্থাপয়েৎ। এবং প্রত্যেকং জলং স্পৃষ্ট্বা পিতামহাদি পঞ্চভ্যোহর্ঘ্যং দত্ত্বা ওঁ যা দিব্যা ইতি প্রত্যেকমনুমন্ত্র্য সংশ্রবসহিতং পাত্রাণি যথাস্থানং সংস্থাপ্য যথাক্রমং পিতৃপাত্রে পিতামহাদি পঞ্চপাত্রস্থ সংশ্রবজলং গৃহীত্বা পিতৃপাত্রং প্রপিতামহপাত্রেণ পিধায় কর্ত্তুর্ব্বামপার্শ্বে সমূলদর্ভোপরি ওঁ পিতৃভ্যঃ স্থানমসীতি সংস্থাপ্য ন্যুব্জং বা কুর্য্যাৎ। ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্ এবং পিতামহ প্রপিতামহামুক দেবশর্ম্মন্নেতানি তে গন্ধপুষ্প ধূপ দীপাচ্ছাদনানি স্বধা নমঃ। ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ। এতত্তে আচ্ছাদনং ইতি নিবেদয়েৎ। এবং মাতামহাদিভ্যো গন্ধাদি ৫১৬
দদ্যাৎ। ততঃ ওঁ পিত্রার্চ্চনং সম্পূর্ণং জাতমিতি পৃচ্ছেৎ। ওঁ সম্পূর্ণং জাতমিতি প্রতিবচনং। ততো ঘৃতাক্তমন্নমাদায় ওঁ অগ্নৌ করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনং। বিপ্রপাণৌ জলে বা। ওঁ সোমায় পিতৃমতে স্বধা নমঃ। ওঁ অগ্নয়ে কব্যবাহনায় স্বধা নমঃ। ইত্যাহুতিদ্বয়ং জুহুয়াৎ। স্বাহান্ত মন্ত্রপক্ষে উপবীতী অগ্নিপূর্ব্বকং আহুতির্দ্বয়ং জুহুয়াৎ। বৃত্তিকারমতে নান্দীমুখ এব স্বাহান্তমন্ত্রাভ্যাং হোম ইতি। ততো ব্রাহ্মণসংমুখস্থ কুশাদিকমপনীয় দৈবে ঐশানীমারভ্য প্রাগগ্রয়া রেখয়া দক্ষিণাবর্ত্তেন চতুষ্কোণমণ্ডলং কৃত্বা পিত্রে নৈর্ঋতিমারভ্য দক্ষিণাগ্রয়া রেখয়া বামাবর্ত্তেন বৃত্তমণ্ডলং কৃত্বা গোময়েনোপলিপ্য দৈবে যববশালীন্দর্ভান্ ন্যস্য তদুপরি সৌবর্ণং পাত্রং অন্যদ্বা অনিন্দং পাত্রং নিধায় পিত্রে মণ্ডলোপরি

সতিলসলিলান্দর্ভান্ ন্যস্য তদুপরি রাজতাদি পাত্র নিধায় আজ্যেনোপস্তীর্য্য দৈবাদিক্রমেণান্নাদিকং দত্ত্বা পাত্রান্তরিত
হস্তাভ্যাং পত্নী স্বয়ং বা পরিবেশয়েৎ। উপকরণঞ্চ পাত্রান্তরে কৃত্বা ভূমৌ সংস্থাপয়েৎ। নত্বেক হস্তেন কেবলং হস্তাভ্যাং পরি-
বেশয়েৎ। নৈকব্যঞ্জনবৎ। ততোহন্নোপরি হৃতশেষং দত্ত্বা পিণ্ডার্থং কিঞ্চিৎ স্থাপয়েৎ। ততো দৈবে উপবীতী অনুত্তান
হস্তাভ্যাং পাত্রং ধৃত্বা ওঁ পৃথিবী তে পাত্রং দ্যৌঃ পিধানং ব্রাহ্মণস্য মুখে অমৃতে অমৃতং জুহোমি ব্রাহ্মণানাং বিদ্যাবতাং প্রাণা-
পানয়োর্জ্জুহোম্যক্ষিতমসি ন মৈষাং ক্ষেষ্টা অমুত্রামস্মিন্ লোকে। ইত্যভিমন্ত্র্য পিত্রে উত্তান হস্তাভ্যাং পাত্রং ধৃত্বা ওঁ পৃথিবী
তে পাত্রমিত্যাদি মন্ত্রং পঠেৎ। ততো দৈবে উপবীতী ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে। ইতি
ব্রাহ্মণপান্যঙ্গুষ্ঠমন্নে নিবেশ্য ওঁ বিষ্ণো হব্যং রক্ষস্ব ইত্যভ্যুক্ষ্য তুষ্ণীং যবান্ বিকীর্য্য সযবোদক কুশপত্রত্রয় মাদায় ওঁ পুরূ- ৫১৭
রবো মাদ্রবসৌ বিশ্বেদেবা ইদং বোহন্নং স্বাহা। ইত্যুৎসৃজেৎ। ততঃ পিত্রে প্রাচীনাবীতী দক্ষিণামুখঃ। ওঁ ইদং বিষ্ণুরিতি
পান্যঙ্গুষ্ঠমন্নে নিবেশ্য ওঁ বিষ্ণো কব্যং রক্ষস্ব ইতি অভ্যুক্ষ্য ওঁ অপহতা সুরা রক্ষাংসি বেদিসদ ইতি তিলান্ বিকীর্য্য বাম-
হস্তেনান্নপাত্রং ধৃত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্ এবং পিতামহ প্রপিতামহামুক দেবশর্ম্মন্নিদন্তেহন্নং সোপকরণং
সজলং স্বধা নমঃ। ইত্যুৎসৃজেৎ। এবং মাতামহপক্ষেপি। ততঃ প্রত্যেকং জলং দত্ত্বা অন্নে মধুসর্পিরাসিচ্য গায়ত্রীং ত্রিঃ
সকৃদ্বা ওঁ মধুবাতেতি পঠিত্বা মধু মধ্বিতি জপেৎ। ওঁ অন্নহীনং ক্রীয়াহীনং বিধিহীনঞ্চ যদ্ভবেৎ। তৎ সর্ব্বমচ্ছিদ্রমস্তু।
ততঃ প্রত্যেকং পাঠয়েৎ তদ্যথা। সপ্রণব ব্যাহৃতিকাং গায়ত্রীং। অক্ষন্নমী মদন্ত হ্যব প্রিয়া অধূষত অস্তোষত। স্বভানবো

বিপ্রান্ বিষ্ঠয়া যতীয়ো যান্নিন্দ্রতে হরী॥ মধুবাতেতি মধু মধ্বিতি চ। ওঁ যজ্ঞেশ্বরো হব্য ইত্যাদি। ওঁ যোগীশ্বরমিত্যাদি যাজ্ঞ-
বল্ক্যোক্ত শ্লোকত্রয়ং। ওঁ তদ্বিষ্ণোরিত্যাদি। ওঁ দুর্য্যোধনো মন্যুময় ইত্যাদি। ওঁ যুধিষ্ঠিরো ধর্ম্মময় ইত্যাদি। ওঁ
সপ্তব্যাধা দশার্ণেষু ইত্যাদি। ওঁ ঈশানবিষ্ণুকমলাসনকার্ত্তিকেয়বহ্নিত্রয়ার্করজনীশধনেশ্বরাণাং। ক্রৌঞ্চামরেন্দ্রকলসোদ্ভবকাশ্য-
পানাং পাদান্নমামি সততং পিতৃমুক্তি হেতুন্। ওঁ মধুবাতেতিত্র্যৃচং। ওঁ অক্ষন্নমীতি পঠেৎ। ততো দেবব্রাহ্মণে
জলং দত্ত্বা প্রাচীনাবীতী পাতিত বামজানুঃ ওঁ তৃপ্তা স্থ ইতি পৃচ্ছেৎ। ওঁ তৃপ্তাঃ স্ম ইত্যনুজ্ঞাতঃ। ওঁ শেষমন্নং ক্বদেয়-
মিতি পৃচ্ছেৎ। ইষ্টেভ্যো দীয়তামিত্যনুজ্ঞাতঃ। ওঁ সম্পন্নমিতি পৃচ্ছেৎ। ওঁ সুসম্পন্নমিতি তৈরুক্তে তদা শ্রাদ্ধং সমাপ্ত্যু-
ত্তরে ইষ্টৈঃ সহভুঞ্জীত ততো ব্রাহ্মণেভ্য উত্তরাপোশানং দদ্যাৎ। তত আচান্তেষু তেষ্বনাচান্তেষু বা পিণ্ডান্ দদ্যাৎ। ভুক্ত-
শেষাৎ সর্ব্ববিধ মন্নমুদ্ধৃত্যাহুতশিষ্টেন সহ একত্রী কৃত্য পিণ্ডার্থং প্রভূততরং বিকীরণার্থঞ্চ স্বল্পং পৃথক্ স্থাপয়েৎ॥ অথ পিণ্ডদানং।
ওঁ পিণ্ডদানমহং করিষ্যে ওঁ কুরুষ্বেত্যনুজ্ঞাতঃ। উপবীতী প্রাঙ্মুখঃ প্রণবাদ্যন্তাং ব্যাহৃতিকাং গায়ত্রীং। ওঁ দেবতাভ্য ইতি ত্রির্জ-
পিত্বা প্রাচীনাবীতী দক্ষিণামুখঃ পাতিতবামজানুঃ। ব্রাহ্মণান্তিকে পিণ্ডস্থানমুপস্কৃত্য দর্ভমূলেন ওঁ অপহতেতি মন্ত্রেণ
পিতৃব্রাহ্মণসংমুখে দক্ষিণাগ্রামেকাং রেখাং উল্লিখ্য এবং মাতামহসংমুখেপি রেখে অদ্ভিরভ্যুক্ষ্য তয়োরুপরি দক্ষিণাগ্রান্
হস্তপ্রমাণান্ দর্ভানাস্তীর্য্য সতিলজলপুষ্পং গৃহীত্বা বামাম্বারব্ধ দক্ষিণহস্তেন পিতৃরেখাস্তীর্ণ কুশমূলেষু ওঁ সুন্ধন্তাং পিতরঃ। কুশ-
মধ্যে ওঁ সুন্ধন্তাং পিতামহাঃ। কুশাগ্রে ওঁ সুন্ধন্তাং প্রপিতামহাঃ। ইতি দত্ত্বা এবং দ্বিতীয় রেখাস্থ কুশমূলেষু ওঁ শুন্ধন্তাং

ইত্যুৎসৃজ্য পিণ্ডোপরি দদ্যাৎ। এবং পিতামহাদি পঞ্চপিণ্ডোপরি দদ্যাৎ। ততঃ পিণ্ডেষু গন্ধাদিনা পূজয়েৎ। ততঃ কৃতাঞ্জলিঃ ওঁ নমো বঃ পিতর ঊর্জ্জে নমো বঃ পিতরঃ শুষ্মায় নমো বঃ পিতরো ঘোরায় নমো বঃ পিতরো জীবায় নমো বঃ পিতরো রসায় স্বধা বঃ পিতরো নমো বঃ এতা যুষ্মাকং পিতর ইমা অস্মাকং জীবা বো জীবন্ত ইহ সন্তস্যাম। ওঁ মনোন্বাহু বামহেনা রাসংসেন সোমেন পিতৃণাঞ্চ মন্মভিঃ। ওঁ আত এত মনঃ পুনঃ ক্রত্বে দক্ষায় জীবসে জ্যোক চ সূর্য্যং দৃশে। ওঁ পুনর্নঃ পিতরো মনো দদাতু দৈব্যো জনো জীবং ব্রাতং সচেমহি। ইতি তিসৃভিঃ পিণ্ডেষুপস্থায় ওঁ ঊর্জ্জং বহন্তীতি পঠিত্বা পিণ্ডেষু জলধারাং দদ্যাৎ ইদন্তু শায়নাচার্য্য লিখিত সৌনক ব্যাখ্যানুসারে লিখিতং ন তু সূত্রকারাদিসম্মতং। ততঃ ওঁ পরেত নঃ পিতরঃ সোম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভি দত্বাস্মভ্যং দ্রবিণে হ ভদ্রং রয়িঞ্চ নঃ সর্ব্ববীরং নিয়চ্ছত। ইতি পিণ্ডান্ চালয়িত্বা পিতৄন্ প্রবাহয়েৎ। 
পিণ্ডান্ গোহজবিপ্রেভ্যো দদ্যাদগ্নৌ জলে বা ক্ষিপেৎ। ততো বিকিরদানং। ব্রাহ্মণাগ্রতঃ প্রোক্ষিতায়াং ভুবি দক্ষিণাগ্রান্ কুশানাস্তীর্য্য সতিলজলেন তান্ প্রোক্ষ্য পূর্ব্বস্থাপিতমন্নং জলপ্লাবিতং গৃহীত্বা ওঁ যে অগ্নিদগ্ধাঃ যে অনগ্নিদগ্ধা মধ্যে দিবঃ স্বধয়া মাদয়ন্তো তেভিঃ স্বধা ন সুনীতিমেতাং যথা বস্যুং তনুং কল্পয়স্ব। ইত্যন্নং ভুবি বিকীর্য্য ওঁ যে ঽগ্নিদগ্ধাঃ কুলেজাতা নাগ্নিদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিং। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্নতথান্নমস্তি। তত্তৃপ্তয়ে ঽন্নং ভুবি দত্ত মেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। ইতি সতিল জলং দদ্যাৎ। পরিশিষ্টকার সম্মতোঽয়ং মন্ত্রঃ। শায়নাচার্য্যেণ তু ওঁ অগ্নিদগ্ধেতি মন্ত্রো ন লিখিতঃ ততো হস্তং প্রক্ষাল্যাচম্য হরিং স্মৃত্বা প্রাচীনাবীতী ওঁ সুসুপ্রোক্ষিতমস্ত্বিতি ব্রাহ্মণাগ্রভূমি-

মাতামহা ইত্যাদি। ইতি সতিলপুষ্পং দদ্যাৎ। ততঃ পূর্ব্বস্থাপিতমন্নেন ওঁ অক্ষন্নমীতি পঠিত্বা ওঁ মধুবাতেতি পিণ্ডান্ নির্ম্মায় মন্ত্রপাঠস্তু ন সূত্রকারসম্মতঃ শায়নাচার্য্যেণ লিখিতং মধ্বাভিঘারিতান্ কৃত্বা একং পিণ্ডং দক্ষিণ হস্তেনাদায় সতিল জলান্বিতং ভুগ্ন কুশপত্রত্রয়েণ ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেষ তে পিণ্ডো যে চাত্র ত্বামনু তেভ্যশ্চ স্বধা নমঃ ইতি বামহস্তান্বারব্ধদক্ষিণ হস্তেন প্রথমাস্তীর্ণ কুশমূলেষু তিলাম্বুসিক্তে দেশে দদ্যাৎ। ততঃ প্রত্যেকং জলস্পর্শ পূর্ব্বকং পিতামহাদি বৃদ্ধপ্রমাতামহান্তানাং পঞ্চ পিণ্ডান্ দদ্যাৎ। হস্তলেপঞ্চ পিতৃপক্ষাস্তীর্ণ কুশমূলেন। ওঁ লেপভুজঃ পিতরঃ প্রীয়ন্তামিতি করং নিম্নৃষ্য হস্তং প্রক্ষাল্যাচম্য হরিং স্মৃত্বা ওঁ পিতরো মাদায়ধ্বং যথাভাগ মাবৃষায়ধ্বং ইতি জপেৎ। ততো বামাবর্ত্তেনোদঙ্মুখী ভূয় যথাশক্তি প্রাণান্ সংযম্য প্রত্যাবৃত্য সর্ব্বান্ পিতৄন্ ভাস্কর মূর্ত্তিকান্ তুষ্টান্ ধ্যায়ন্ ওঁ বসন্তায় নমস্তুভ্যমিত্যাদি পঠিত্বা ষড়ৃতুন্নমস্কৃত্য ওঁ অমী মদন্ত পিতরো যথাভাগ মাবৃষায়িষত ইতি জপন্ শ্বাসং মুঞ্চেৎ। ততঃ পিণ্ডশেষমাত্রায় হস্তৌ প্রক্ষাল্যাচম্য পূর্ব্ববৎ শুন্ধন্তাং পিতর ইতি পিণ্ডোপরি সতিল জলং দত্ত্বা এবং ক্রমেণ পিতামহাদি বৃদ্ধপ্রমাতামহান্তানাং পঞ্চপিণ্ডোপরি মন্ত্রোহেন সতিল জলং দদ্যাৎ। ততো নিবীং বিস্রংস্য দ্বিরাচম্য ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নভ্যঙ্‌ক্ষ্ব ইতি পিণ্ডোপরি ঘৃতং তিলতৈলম্বা দদ্যাৎ। এবং পিতামহাদি পঞ্চপিণ্ডোপরি দদ্যাৎ। ততঃ ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্ন ভাঙ্‌ক্ষ্ব ইতি পিণ্ডোপরি অঞ্জনং দত্ত্বা এবং মাতামহাদি পঞ্চানাং পিণ্ডোপরি দদ্যাৎ। ততো নবমনবম্বা শুক্লবস্ত্রদশাভবং সূত্রং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ এতদ্বঃ পিতরো বাসো মানতোঽন্যৎ পিতরো যুঙধ্বং ইতি পঠিত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে বাসঃ স্বধা নমঃ। ৫২০

মাসিচ্য ততো দৈবপূর্ব্বকং প্রত্যেকং জলং ওঁ শিবা আপঃ সন্ত্বিতি ব্রাহ্মণে দদ্যাৎ। ওঁ সন্ত্বিতি প্রতিবচনং। ওঁ সৌমনস্য
মস্ত্বিতি পুষ্পং অস্ত্বিতি প্রতিবচনং। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্ত্ব ইত্যক্ষতং ওঁ অস্ত্বিতি প্রতিবচনং। ততস্তিলাজ্যমধুযুক্ত জলং গৃহীত্বা
ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো দত্তমিদমন্নপানাদিকমক্ষয্যমস্তু ইতি দদ্যাৎ। অস্ত্বিতি প্রতিবচনং।
এবং পিতামহাদি পঞ্চভ্যো দদ্যাৎ। ওঁ অঘোরাঃ পিতরঃ সন্ত্বিতি প্রতিবচনং। ওঁ গোত্রন্নো বর্দ্ধতাং বর্দ্ধতামিত্যুত্তরং।
ন্যুব্জভবনপক্ষে ন্যুব্জীকৃত পাত্রমুত্তানীকৃত্য তজ্জলং স্পৃষ্ট্বা ব্রাহ্মণেভ্যস্তাম্বূলাদিং দত্ত্বা উপবীতী পিতৃপূর্ব্বকং দক্ষিণাং দদ্যাৎ।
অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ঽমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণো ঽমুক গোত্রস্য প্রপিতামহস্যামুক
দেবশর্ম্মণঃ কৃতৈতদমুক নিমিত্তক পার্ব্বণশ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণাং রজতমূল্যং বিষ্ণুদৈবতং ব্রাহ্মণায়াহং দদানি। এবং ৫২১
মাতামহাদি পক্ষেপি। তত উত্তরাভিমুখঃ। অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ ইত্যাদি বৃদ্ধপ্রমাতামহ পর্য্যন্তং
ওঁ পুরূরবো মাদ্রবসৌ বিশ্বেষাং দেবানাং কৃতৈতৎ অমুক নিমিত্তক পার্ব্বণশ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণাং কাঞ্চনমূল্যমি-
ত্যাদি। ইতি দক্ষিণাং দদ্যাৎ। প্রিয়োক্তিভি স্তান্ পরিতোষ্য শ্রাদ্ধমিদং সম্পূর্ণং জাতমিতি পৃচ্ছেৎ। সম্পূর্ণং জাতমিতি
ব্রাহ্মণৈরুক্তে ততঃ পবিত্রসহিতান্ দর্ভান্ পিণ্ডস্থানে আস্তীর্য্য ওঁ স্বধাং বাচয়িষ্যে ইতি প্রার্থয়েৎ। বাচ্যতামিতি প্রতি-
বচনং। ওঁ পিতৃভ্যঃ স্বধোচ্যতাং এবং বৃদ্ধপ্রমাতামহ পর্য্যন্তং স্বধাং বাচয়িত্বা ব্রাহ্মণানুত্থাপয়েৎ। তেপি স্বধেতি ব্রুবন্তু
উত্তিষ্ঠতঃ ওঁ বিশ্বেদেবাঃ প্রীয়ন্তামিতি দৈবে বাচয়েৎ। প্রীয়ন্তামিত্যুক্ত্বা দৈবব্রাহ্মণাবুত্তিষ্ঠেতাং। বাজে বাজে ইতি পঠিত্বা

বিপ্রদেহস্থিতান্ পিত্রাদীন্ পিতৃপূর্ব্বকং বিসর্জ্জয়েৎ। ওঁ আ মা বাজস্যেতি মন্ত্রেণ প্রদক্ষিণ বারিধারয়া বেষ্টয়ন্ প্রণমেৎ। ততঃ কৃতাঞ্জলিঃ সুমনাস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ পিতৄন্ যাচেৎ। ওঁ দাতারো নো বিবর্দ্ধন্তা মিত্যাদিনা যাচয়েৎ। ততঃ সপ্রণবব্যাহৃতিকাং গায়ত্রীং দেবতাভ্য ইতি জপেৎ। শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণায় দদ্যাদগ্নৌ জলে বা ক্ষিপেৎ। ততো দক্ষিণ-পাণিনা দীপমাচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্য এতৎ কর্ম্মাচ্ছিদ্রমস্ত্বিতি বদেৎ। অস্ত্বিতি প্রতিবচনং। অদ্যেত্যাদি কৃতৈতৎ শ্রাদ্ধবৈগুণ্য প্রশমনকামো বিষ্ণুস্মরণমহং করিষ্যে ইতি সঙ্কল্প্য ওঁ তদ্বিষ্ণোরিতি বিষ্ণুং স্মরেৎ॥ * ॥ * ॥

॥ * ॥ ইতি পার্ব্বণশ্রাদ্ধ প্রয়োগঃ॥ * ॥

অথান্ত্যেষ্টি পদ্ধতিঃ॥ * ॥ গতপ্রাণং জ্ঞাত্বা পুত্রাদিঃ স্নাত্বা অন্নং কৃত্বা স্থাপয়েৎ। ততো গতপ্রাণং স্নাপয়িত্বা বাসসা সর্ব্বশরীরমাচ্ছাদ্য আস্তীর্ণকুশেষু দক্ষিণশিরসং স্থাপয়েৎ। ততো ঘৃতেনাভ্যজ্য ওঁ গয়াদীনি চ তীর্থানি যে চ পুণ্যাঃ শিলোচ্চয়াঃ। কুরুক্ষেত্রঞ্চ গঙ্গাঞ্চ যমুনাঞ্চ শরিদ্বরাং। কৌশিকীঞ্চন্দ্রভাগাঞ্চ সর্ব্বপাপপ্রনাশিনীং। ভদ্রাবকাশাং শরযূং গণ্ডকীং পনসন্তথা। বৈণবঞ্চ বরাহঞ্চ তীর্থং পিণ্ডারকন্তথা। পৃথিব্যাং যানি তীর্থানি সরিতঃ সাগরাস্তথা। ইতি চিন্তয়িত্বা পুনঃ স্নাপয়েৎ। বস্ত্রান্তরং পরিধাপ্য উপবীতমুত্তরীয়ঞ্চ ধারয়িত্বা চন্দনাদিনোপলিপ্য কর্ণনাসিকানেত্রদ্বয়মুখাত্মকেষু সপ্ত ছিদ্রেষু সপ্ত সুবর্ণ খণ্ডিকাঃ প্রক্ষিপেৎ। তদভাবে কাংশ্যাদি খণ্ডিকাঃ। ততো বস্ত্রান্তরেণাচ্ছাদ্য বহেয়ুঃ। বহনকালে আম-পাত্রাৎ অন্নার্দ্ধং বর্ত্মার্দ্ধে ত্যজেৎ। অর্দ্ধং পিণ্ডার্থমবশেষয়েৎ। ততো হগ্নিদাতা পুত্রাদিঃ চিতাভুমৌ গত্বা তদন্নার্দ্ধং তিল সহিতং পিণ্ডদানেতিকর্ত্তব্যতয়োৎসৃজেৎ। তদযথা গোময়োপলিপ্তায়াং ভুমৌ পাতিত বামজানুঃ প্রাচীনাবীতী কুশমূলেন ওঁ অপহতা সুরারক্ষাংসি বেদিসদ। ইত্যনেন দক্ষিণাগ্রাং রেখাং কুর্য্যাৎ। তদুপরি কুশানাস্তীর্য্য ওঁ এহি প্রেত সোম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দ্দত্তাস্মভ্যং দ্রবিণে হ ভদ্রং রয়িঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত ইত্যাবাহ্য সতিলজলপাত্রং বামহস্তা-দ্দক্ষিণহস্তেন গৃহীত্বা ওঁ অদ্যামুক গোত্র প্রেতামুক দেবশর্ম্মন্নবনেনিক্ষ্ব উপতিষ্ঠতাং ইত্যবনে জয়েৎ। ওঁ অদ্যামুক গোত্র প্রেতা-মুক দেবশর্ম্মন্নেতৎপিণ্ড মুপতিষ্ঠতাং। ) ইতি বামহস্তে গৃহীতামপাত্রাদন্নার্দ্ধং সতিলং দক্ষিণহস্তেন গৃহীত্বা কুশোপরি দদ্যাৎ। পিণ্ডপাত্র প্রক্ষালন জলেন তদুপরি পুনরবনেজনং তুষ্ণীং গন্ধাদিদানং সামগেতরেষাঞ্চ নাবাহনমিতি বিশেষঃ। ততঃ পুত্রাদিঃ

স্নানং কৃত্বা চিতাং রচয়িত্বা তত্র দারুচয়ং কুর্য্যাৎ। তদুপরি বস্ত্রদ্বয়সহিতং দক্ষিণশিরসং সামগস্যধোমুখং পুমাংসং ন্যসেৎ নার্য্যাস্তু উত্তান দেহং সামগেতরেষাস্তু উত্তরশিরসং। ততো দেবাশ্চাগ্নিমুখাঃ সর্ব্বে হুতাশনং গৃহীত্বা এনং দহন্তীতি মনসা ধ্যাত্বা অগ্নিং গৃহীত্বা ওঁ কৃত্বা তু দুষ্করং কর্ম্ম জানতাবাপ্যজানতা। মৃত্যুকালবশং প্রাপ্য নরং পঞ্চত্বমাগতং। ওঁ ধর্ম্মাধর্ম্মসমাযুক্তং লোভমোহসমাবৃতং। দহেয়ং সর্ব্ব গাত্রাণি দিব্যান্ লোকান্ স গচ্ছতু। ইতি পঠিত্বা প্রদক্ষিণং কৃত্বা দক্ষিণামুখ শিরঃ স্থানে দদ্যাৎ। স্ত্রীদাহে তু নরমিত্যেব পাঠঃ ন নারীত্যূহঃ। ততো দাহে বৃত্তে প্রাদেশপ্রমাণাঃ সপ্তকাষ্ঠিকা গৃহীত্বা চিতাগ্নিং সপ্তবারান্ প্রদক্ষিণীকৃত্য সপ্তকাষ্ঠিকা একৈকক্রমেণ চিতাগ্নৌ প্রক্ষিপেৎ। ততঃ কুঠারেণ ওঁ ক্রব্যাদায় নমস্তুভ্যং ইতি মন্ত্রং সকৃৎ পঠিত্বা চিতাস্থ জ্বলদ্দারূপরি সপ্ত প্রহারা দেয়াঃ তমগ্নিমপশ্যন্। বামাবর্ত্তেন স্নাতুং নদীগন্তব্যা নগ্নং শবং ন 
দহেৎ। শবসম্বন্ধি বস্ত্রাদি শ্মশানবাসি চণ্ডালাদিভ্যো দদ্যাৎ। সূতিকাং রজস্বলাঞ্চ সতিল পঞ্চগব্যৈঃ ওঁ আপোহিষ্ঠীয় বামদেব্যাদিভি র্মন্ত্রৈঃ স্নাপয়িত্বা দহেদিতি বিশেষঃ। গর্ভবত্যাস্তু গর্ভং নিঃসার্য্য স্থানান্তরে নিঃক্ষিপ্যাস্যা দাহঃ কর্ত্তব্যঃ। জলসমীপং গত্বা পুত্রাদায়ঃ প্রত্যুত্তরদানাভিজ্ঞং শ্যালকাদিকং প্রার্থয়েয়ুঃ। উদকং করিষ্যাম ইতি তেন চ কুরুধ্বং মাচৈবং পুনঃ কুরুধ্বমেবৈতরস্মিন্নিতি উত্তরে দত্তে বৃদ্ধপুরঃসরমেবতরণং জলে। ততঃ পরিহিত বস্ত্রং প্রক্ষাল্য তদেব পরিধায় প্রাচীনাবীতী দক্ষিণামুখঃ। আপো নঃ শোশুচদঘমিতি মন্ত্রেণ বামহস্তানামিকয়া অপ আলোড্য একবস্ত্রাঃ সকৃন্নিমজ্যাচম্য দক্ষিণামুখাস্তর্পয়েয়ুঃ। ওঁ অমুক গোত্রং প্রেতং অমুক দেবশর্ম্মাণং তর্পয়ামীতি সামগানাং প্রয়োগঃ। পুনঃ স্নাত্বা জলাদুত্থানং বালপুরঃসরং কার্য্যং।

ততো নরঃ প্রেতং চিন্তয়িত্বা গৃহদ্বারং সমাগম্য নিম্বপত্রাণি দন্তৈঃ খণ্ডয়িত্বা শমীপাপং সময়ত্বিতি শমীং স্পৃষ্টোদকং গোময়ং গৌরসর্ষপাংশ্চ স্পৃষ্ট্বা বালপুরঃসরং গৃহং প্রবিশেয়ুঃ। ওঁ অশ্মেব স্থিরো ভূয়াসং ইত্যস্মানং পদা স্পৃষ্ট্বা অগ্নির্নঃ শর্ম্ম যচ্ছতু ইত্যগ্নিং স্পৃশেৎ বৃষভচ্ছাগয়োর্ম্মধ্যে স্থিত্বা ত্যাগিতি মন্ত্রেণ দ্বাবপি স্পৃষ্ট্বা গৃহং প্রবিশেৎ। দিবাচেদ্দাহস্তদা রাত্রৌ প্রবেশঃ। রাত্রৌ চেত্তদা দিবা প্রবেশঃ। অশক্তৌ ব্রাহ্মণানুমতিং গৃহীত্বা কালপ্রতীক্ষণং বিনা প্রবেষ্টব্যমিত্যন্ত্যেষ্টি পদ্ধতিঃ॥ *

অথ ঋগ্বেদি পূরকপিণ্ডদানং॥ * ॥ তত্র ক্রমঃ প্রসৃতদ্বয়মাত্রং তণ্ডুলং পক্ত্বা দক্ষিণামুখঃ প্রাচীনাবীতী পাতিত বামজানুঃ পিণ্ডস্থানমুপস্কৃত্য ওঁ অপহতেত্যনেন দক্ষিণাগ্রাং রেখামুল্লিখ্য তাং অদ্ভিরভ্যুক্ষ্য দক্ষিণাগ্রান্ দর্ভানাস্তীর্য্য ওঁ শুন্ধন্তাং প্রেতা ইত্যনেন জলং। ততস্তিল মধু ঘৃত দুগ্ধমিশ্রং পিণ্ডং গৃহীত্বা ওঁ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণ এতৎ প্রথমপিণ্ডং শিরঃ পূরকমুপতিষ্ঠতাং। ততঃ পিণ্ডপাত্রং প্রক্ষাল্য ওঁ শুন্ধন্তাং প্রেতা ইতি পিণ্ডোপরি দদ্যাৎ। তত ঊর্ণাতন্তুময়ং বাসো গৃহীত্বা ওঁ এতদ্বঃ প্রেতাবাসো মানোহন্তোহন্যৎ প্রেতায়ুঙধ্বং। ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতদূর্ণাতন্তুময়ং বাসস্তামুপ-তিষ্ঠতাং ইতি পিণ্ডোপরি দদ্যাৎ। গন্ধাদিনা পিণ্ডং পূজয়েৎ। ততো নীরায় নমঃ ক্ষীরায় নমঃ ইত্যর্চ্চনং কৃত্বা ওঁ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ এতৎ স্নানার্থং নীরমুপতিষ্ঠতাং। অত্র স্নাহীতি বদেৎ। ওঁ অমুক গোত্রস্য প্রেতস্যামুক দেব-শর্ম্মণঃ পানার্থমিদং ক্ষীরমুপতিষ্ঠতাং। ইদং পিব ইতি বদেৎ। তত কৃতাঞ্জলিঃ। শ্মশানানলদগ্ধোহসি পরিত্যক্তোহসি বান্ধবৈঃ। ইদং নীরমিদং ক্ষীরমত্র স্নাহি ইদং পিব। ওঁ আকাশস্থো নিরালম্বো বায়ুভূতো নিরাশ্রয়ঃ। অত্র স্নাত্বা ইদং

পীত্বা স্নাত্বা পীত্বা সুখী ভব। ততঃ কাকবলিঃ। বায়সেভ্যঃ পাদ্যাদিকং দত্ত্বা উৎসৃজেৎ। অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যা-
মুক দেবশর্ম্মণঃ তৃপ্ত্যর্থং যমদ্বারাবস্থিত নানা দিগ্‌দেশীয় বায়সেভ্য এষ বলির্নমঃ। কৃতাঞ্জলিঃ। ওঁ কাক ত্বং যমদূতোসি গৃহাণ
বলিমুত্তমং। যমলোকগতং প্রেতং ত্বমাপ্যায়িতুমর্হসি। কাকায় কাকপুরুষায় বায়সায় মহাত্মনে। অত্র পিণ্ডং প্রযচ্ছামি
কথ্যতাং ধর্ম্মরাজনি। ইতি পঠেৎ। ততো বাষ্পাপাতপর্য্যন্তং পিণ্ডং পশ্যেৎ। বাষ্পে নিবৃত্তে পিণ্ডং জলে ক্ষিপেৎ।
এবং দ্বিতীয় পিণ্ডং কর্ণাক্ষিনাসাপূরকং ॥ ২ ॥ তৃতীয়পিণ্ডং গলাংসভূজবক্ষঃ পূরকং ॥ ৩ ॥ চতুর্থপিণ্ডং নাভিলিঙ্গগুদ
পূরকং ॥ ৪ ॥ পঞ্চমপিণ্ডং জানু জঙ্ঘপাদ পূরকং ॥ ৫ ॥ ষষ্ঠপিণ্ডং সর্ব্ববর্ম্ম পূরকং ॥ সপ্তমপিণ্ডং সর্ব্বনাড়ী পূরকং ॥ ৭ ॥
অষ্টমপিণ্ডং দন্তরোম পূরকং ॥ ৮ ॥ নবমপিণ্ডং বীর্য্যপূরকং ॥ ৯ ॥ দশমপিণ্ডং পূর্ণতা তৃপ্ততা ক্ষুদ্বিপর্য্যয় পূরকং ॥ ১০ ॥
অত্র একৈকাঞ্জলয়ো বর্দ্ধন্তে মিলিত্বা বিংশত্যঞ্জলয়ো ভবন্তি ॥ * ॥ * ॥ * ॥

অথ ঋগ্বেদি চতুর্থীশান্তিঃ॥ অগ্নিং প্রজ্বাল্য ব্রাহ্মণান্ স্বস্তিবাচ্য পাত্রচতুষ্টয়ে জলং সংস্থাপ্য প্রথমপাত্রে হস্তং দত্ত্বা
গায়ত্রীং পঠেৎ। ওঁ শন্নো দেবীরিতি। ওঁ স্যোনা পৃথিবীভবানৃক্ষরা নিবেশানীযচ্ছানঃ শর্ম্ম সঃ প্রথা। ওঁ দ্যৌঃ শান্তিরীক্ষং
শান্তিঃ পৃথিবী শান্তিরাপঃ শান্তিরোষধয়ঃ শান্তির্বনস্পতয়ঃ শান্তিঃ শান্তিরেব শান্তিঃ॥ ২॥ অপর পাত্রে হস্তং দত্ত্বা গায়ত্রীং
পঠেৎ। ওঁ শন্নো দেবীরিতি। ওঁ আপো হিষ্ঠেতি তিসৃভিঃ। ওঁ অন্নয়োন সহোবাচ বিজ্ঞায়তেহাস্তি হিরণ্যস্য পাত্তং গোহশ্বানাং
দাসীনাংপ্রবরাণাং পরিধানাং মা নো ভবান্নহোরণং তস্মা পর্য্যন্তুস্য হবদান্যেভূদিতিস বৈ গোতমতীর্থেনেক্ষাসা ইত্যুপৈষ্য হস্তব-
মিতি বাচাহমস্মৈব পূর্ব্ব উপয়ন্তি সহোবাপায়ন কর্ত্তা উবাচ সহোবাচ দেবেযু বৈ গোতমতদ্ভুত্তরেষু মানুষাণাং ব্রুহি অপি হিনার্চ্চিসঃ। ওঁ
দ্বেসৃতী অসৃণবং পিতৃণামহন্দেবানামুত মর্ত্যানাং তাভ্যামিদং বিশ্ববেদসং যজন্তরং মাতরঞ্চরেভি করত ইতি প্রতিকাম্যদাজহার। 
পুনর্গায়ত্রী॥ ২॥ ইতি দ্বিতীয়াশান্তিঃ। ততো বামহস্ততলে শর্করা কুলোত্থঞ্চ গৃহীত্বা নিষ্ঠীব্যাচম্য তৃতীয়পাত্রেহস্তং দত্ত্বা গায়ত্রীং
পঠিত্বা ওঁ শন্ন ইন্দ্রাগ্নী ভবতামরোভিঃ শন্ন ইন্দ্রা বরুণা রাতহব্যাঃ। শন্না ইন্দ্রা পূষণাবাজসাতৌ সমিন্দ্রা সোমা সবিতায়সং যোঃ। ওঁ
শন্নোদেবীরগ্নয়ঃ পাবকাং শন্নো দিব্য আপঃ পৃথিবীর্যাতাম্যদিব্যো বিশ্বেদেবা ভবন্তু নঃ শন্নঃ সন্তু যজ্ঞাঃ। ওঁ স্যোনা পৃথিবীতি। ওঁ
আপোহিষ্ঠেতি তিসৃভিঃ। ওঁ দ্যৌঃ শান্তিরিত্যাদি। ওঁ ধ্রুতে দৃগ্মু হং মামিত্রস্য চক্ষুষা সর্ব্বাণি ভুতানি সমিক্ষন্তাং মিত্রস্যাহং চক্ষুষা
সর্ব্বাণি ভূতানি সমীক্ষে মিত্রস্য চক্ষুষা সমীক্ষামহে। ওঁ ধ্রুতে দৃগ্নু হং মাজ্যোক্তে সংদৃশী জীব্যাসং জ্যোক্তে সংদৃশী জীব্যাসং।
নমস্তে হরসে শোচিষে নমস্তে হর্চ্চিষে অন্যাস্তে অস্মত্তপন্তু হেতয়ঃ পাবকোদ্যং শিবোভব। ওঁ নমস্তেস্তু সমীবিদ্যুতে নমস্তে ভগবন্নস্তু

অথ ঋগ্বেদি চতুর্থশান্তিঃ ॥ অগ্নিং প্রজ্বাল্য ব্রাহ্মণান্ স্বস্তিবাচ্য পাত্রচতুষ্টয়ে জলং সংস্থাপ্য প্রথমপাত্রে হস্তং দত্ত্বা
গায়ত্রীং পঠেৎ। ওঁ শন্নো দেবীরিতি। ওঁ স্যোনা পৃথিবীভবানুক্ষরা নিবেশানীযচ্ছানঃ শর্ম্ম সঃ প্রথা। ওঁ দ্যোঃ শান্তিরীক্ষং
শান্তিঃ পৃথিবী শান্তিরাপঃ শান্তিরোষধয়ঃ শান্তির্বনস্পতয়ঃ শান্তিঃ শান্তিরেব শান্তিঃ ॥ ২ ॥ অপর পাত্রে হস্তং দত্ত্বা গায়ত্রীং
পঠেৎ। ওঁ শন্নো দেবীরিতি। ওঁ আপো হিষ্ঠেতি তিসৃভিঃ। ওঁ অন্নয়োন সহোবাচ বিজ্ঞায়তেহাস্তি হিরণ্যস্য পাত্তং গোঽশ্বানাং
দাসীনাংপ্রবরাণাং পরিধানাং মা নো ভবান্নহোরণং তস্মা পর্য্যন্তুস্য হবদান্যোভূদিতিস বৈ গোতমতীর্থেনেক্ষ্বাসা ইত্যুপৈষ্য হস্তব-
মিতি বাচাহমস্মৈব পূর্ব্ব উপয়ন্তি সহোবাপায়ন কর্ত্তা উবাচ সহোবাচ দেবেষু বৈ গোতমতদুত্তরেষু মানুষাণাং ব্রূহি অপি হিনার্চ্চিসঃ। ওঁ
দ্বেসৃতী অসৃণবং পিতৃণামহন্দেবানামুত মর্ত্যানাং তাভ্যামিদং বিশ্ববেদসং যজন্তরং মাতরঞ্চরেভি করত ইতি প্রতিকামুদাজহার। 
পুনর্গায়ত্রী ॥ ২ ॥ ইতি দ্বিতীয়াশান্তিঃ। ততো বামহস্ততলে শর্করা কুলোত্থঞ্চ গৃহীত্বা নিষ্ঠীব্যাচম্য তৃতীয়পাত্রেহস্তং দত্ত্বা গায়ত্রীং
পঠিত্বা ওঁ শন্ন ইন্দ্রাগ্নী ভবতামবোভিঃ শন্ন ইন্দ্রা বরুণা রাতহব্যঃ। শন্না ইন্দ্রা পূষণাবাজসাতৌ সমিন্দ্রা সোমা সবিতায়সং যোঃ। ওঁ
শন্নোদেবীরগ্নয়ঃ পাবকাং শন্নো দিব্য আপঃ পৃথিবীর্যাতাস্ম্যদিব্যো বিশ্বেদেবা ভবন্তু নঃ শন্নঃ সন্তু যজ্ঞাঃ। ওঁ স্যোনা পৃথিবীতি। ওঁ
আপোহিষ্ঠেতি তিসৃভিঃ। ওঁ দ্যোঃ শান্তিরিত্যাদি। ওঁ ধ্বতে দৃগ্মু হং মামিত্রস্য চক্ষুষা সর্ব্বাণি ভূতানি সমিক্ষন্তাং মিত্রস্যাহং চক্ষুষা
সর্ব্বাণি ভূতানি সমীক্ষে মিত্রস্য চক্ষুষা সমীক্ষামহে। ওঁ ধ্বতে দৃগ্নু হং মাজ্যোক্তে সংদৃশী জীব্যাসং জ্যোক্তে সংদৃশী জীব্যাসং।
নমস্তে হরসে শোচিষে নমস্তে হর্চ্চিষে অন্যাস্তে অস্মত্তপন্তু হেতয়ঃ পাবকোদ্যং শিবোভব। ওঁ নমস্তেস্তু সমীবিদ্যুতে নমস্তে ভগবন্নস্তু

যতস্বঃ সমীহসে যতো যতঃ সমীহসে। ততো নো অভয়ং কুরু শন্নং কুরু প্রজাভ্যো ভয়ং নঃ পশুভ্যঃ। ওঁ সুমিত্রায়া ন ওষধয়ঃ সন্তু দুর্ম্মিত্রিয়া স্তস্মৈ সন্তু যোঽস্মান্দ্বেষ্টি যঞ্চ বয়ং দ্বিষ্মঃ। ওঁ তচ্চক্ষুর্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চর পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং শৃণুয়াম শরদঃ শতং। ওঁ তদস্তু মিত্রাবরুণয়ো স্ত্বা মুঞ্চত্বনা দেবেভ্যো মানস্ত্বা গৃহ্নাতু বিশ্বেদেবাস্ত্বা গৃহ্নাতু বিশ্বেদেবাস্ত্বয়ি জগাম॥ ওঁ গৃহাণেনৈব প্রতিষ্ঠাচ্ছত্রং তৎ প্রবিষ্ঠিতং ময়া বাচা সংস্তব্যং তস্মাদদ্যাবিদূরৈঃ পরং পশুনা লভতে গৃহাণেনৈব জিগমিষতি পশূনাং প্রতিষ্ঠা। গায়ত্রীং পঠেৎ ইতি তৃতীয়া শান্তিঃ ॥ ৩ ॥ চতুর্থে হস্তং দত্ত্বা গায়ত্রীং পঠেৎ। ওঁ শর্ম্মা বাতেন্দ্রজীব যস্মাৎ কোষাৎপৃথিবী শান্তিরেব তে অতোস্মাদ্যজীবঃ পরমাত্মা স ইন্দ্রো বায়ু শৌচমস্তুঃ শৌচং দধাতু। ওঁ স্বস্তি নো তদ্বাভিবিক্ষামি। ওঁ ভূর্ভুব স্বস্তত্ত্বাভিষিঞ্চামি ব্রাহ্মণেভ্যো দেবেভ্যঃ সর্ব্বেভ্যো ভূতেভ্যস্ত্বয়ি জগাম। ওঁ ইন্দ্র জীবা সূনীতিঃ সহ মা পুনাতু সোমঃ স্বস্ত্যাবরুণ সুনীত্যা যমো রাজা প্রমৃণাতিঃ পুনাতু মাজাতবেদা সুজ্জয়ন্ত্যা পুনাতু। ওঁ যস্মাৎ কোষস্মে শত পাপমুগ্রং যজ্জায়মানস্য চ কিল্বিদন্যৎ। জ্ঞাতস্য যচ্চাপি চ বর্দ্ধতে মে তৎপাবমানীভিরহং পুনামি। ওঁ গোঘ্নাভস্করত্বাৎ স্ত্রীবধাৎ যচ্চিকিল্বিষং পাবকঞ্চরণেভ্যস্তৎপাবমানীভিরহং পুনামি। ওঁ অস্মত্রাতা দেবত্রাতা গচ্ছ প্রতাদারং শত পাপমুগ্রমাবিষতি। ওঁ দ্যোঃ শান্তিরন্তরীক্ষং শান্তিঃ পৃথিবীশান্তিরোষধয়ঃ শান্তিঃ শান্তিরেব শান্তিঃ। পুনর্গায়ত্রীং পঠেৎ ॥ ততস্তৈস্তৈস্তু রুদকৈঃ সর্ব্বাণি দ্রব্যাণি প্রোক্ষয়েয়ুঃ ॥ * ॥

॥ * ॥ * ॥ ইতি ঋগ্বেদি চতুর্থাশান্তিঃ ॥ * ॥ * ॥

অথাশৌচান্ত দ্বিতীয়দিন শ্রাদ্ধপ্রয়োগঃ॥ * ॥ তত্র পূর্ব্বদিনে ক্ষৌরাদিকং কৃত্বা পরদিনে সূর্য্যোদয়ানন্তরং সশিরস্কগাত্রং স্নাত্বা ব্রাহ্মণঃ শান্তিং কৃত্বা মাঙ্গল্যং ঘৃতাদি স্পৃষ্ট্বা দ্বিরাচম্য দক্ষিণহস্তে ব্রাহ্মণান্ স্বস্তিবাচয়িত্বা বৈধস্নানং কৃত্বা হঙ্গপ্রায়শ্চিত্তং কুর্য্যাৎ। ততঃ সন্ধ্যাদি দেবপূজান্তং কর্ম্ম কৃত্বা যথাশক্তি দানাদিকং কৃত্বা দক্ষিণামুখী ভূয় কৃতপাদশৌচো দর্ভহস্তঃ প্রাঙ্মুখো বা দ্বিরাচম্য উপলিপ্তায়াং ভূমৌ মধ্যাহ্নে শ্রাদ্ধপর্য্যদস্তেতরকালে বা দর্ভাসনে চোপবিশ্য তিলতৈলেন দীপং প্রজ্বাল্য ওঁ বাস্তু পুরুষায় নমঃ। ইতি বাস্তুং সংপূজ্য ওঁ তদ্বিষ্ণোরিতি বিষ্ণুং স্মৃত্বা যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং তস্মৈ দত্ত্বা পরকীয়ভূমৌ চেৎ তদা ভূস্বামিনে মূল্যং দত্ত্বা অথবা পিতৃরীত্যা ইদমন্নং ওঁ এতদ্ভূস্বামি পিতৃভ্যঃ স্বধা নমঃ। ইত্যুৎসৃজ্য দদ্যাৎ॥ ততো দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী সতিলজলপ্রোক্ষিত দক্ষিণাগ্রৈক দর্ভযুক্তাসনে দর্ভবটুং সংস্থাপ্য ব্রাহ্মণে জল- ৫২৯
গণ্ডূষং দত্ত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নিদং ত্বামাসনমুপতিষ্ঠতাং ওঁ ইত্যুৎসৃজ্য। ওঁ অত্রাসনে দেবরাজাভ্যনুজ্ঞাতো বিশ্রাম্যতাং দ্বিজবর্য্যানুগ্রহায়। প্রসাদয়ে ত্বাসনং গৃহ্ণপূতং জ্ঞানাগ্নিপূতেন করেণ বিপ্র। ইতি পঠেৎ। অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নিদং ত্বাং ছত্রমুপতিষ্ঠতামিতি দদ্যাৎ এবং উপানদ্ যুগলং শয়নীয়ঞ্চ দদ্যাৎ। ততঃ ওঁ অদ্যেত্যাদি অমুক গোত্রস্যামুক দেবশর্ম্মণো হশৌচান্তাদ্দ্বিতীয়েহহ্নি অমুক গোত্রস্যামুক দেবশর্ম্মণঃ আদ্যৈকোদ্দিষ্ট শ্রাদ্ধং দর্ভময় ব্রাহ্মণেহহং করিষ্যে। ইতি বদেৎ। ওঁ কুরুষ্বেতি প্রতিবচনং। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ দেবতাভ্য ইতি ত্রিঃ পঠেৎ। ততঃ পুণ্ডরীকাক্ষং স্মৃত্বা স্বজলেন শ্রাদ্ধীয় দ্রব্য প্রোক্ষণং কর্ত্তব্যং রক্ষার্থ মুদকপাত্রমেকদেশে স্থাপয়েৎ। ওঁ অঙ্গুষ্ঠমাত্র পুরুষ

ইমাং পর্য্যটতে মহীং। অসুরাণাং বধার্থায় ভূমৌ সংস্থাপিতো ময়া। অনাদি নিধন জ্ঞান নিত্যানন্দ জনার্দ্দন। ময়াত্র শ্রাদ্ধে কর্ত্তব্যে সন্নিধী তব কেশব। ওঁ রক্ষোঘ্নমসীতি পঠেৎ। ততঃ প্রেতার্চ্চনমহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষেতি প্রতিবচনং। প্রেতার্চ্চনং কুর্য্যাৎ। যথা ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নিদং দর্ভাসন মুপতিষ্ঠতাং। ইতি মোটকসহিতং জলং ব্রাহ্মণ বামপার্শ্বে দদ্যাৎ। ততো ব্রাহ্মণাগ্র ভূমিমভ্যুক্ষ্য দক্ষিণাগ্র কুশোপরি ন্যগ্বিলং পাত্রমুত্তানী কৃত্য ওঁ পবিত্রাসি বৈষ্ণবীত্যনেনানখচ্ছিন্নং। ওঁ বিষ্ণুর্ম্মনসা পূতমসীতি প্রোক্ষিতং। একদলং পবিত্রং তৎপাত্রে নিধায় তুষ্ণী মাসিচ্য ওঁ শন্নো দেবীত্যভিমন্ত্র্য ওঁ তিলোসি সোমদেবত্যো গোষবো দেবনির্ম্মিতঃ প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া প্রেতান্ লোকান্ প্রীণাহি নঃ স্বাহা ইত্যনেন তুষ্ণীং বা তিলান্দত্ত্বা গন্ধাদীনি চ ক্ষিপ্ত্বা ওঁ প্রেতপাত্রং সম্পন্নমিত্যভিমৃষ্য তুষ্ণীং পবিত্রং দত্ত্বা অন্যাপো দত্ত্বা অর্ঘ্যমাদায় ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নিদং ত্বাং অর্ঘ্যমুপতিষ্ঠতাং। ইত্যুৎসৃজ্য ব্রাহ্মণে দত্ত্বা তৎপাত্রং বামহস্ততলে সংস্থাপ্য দক্ষিণ হস্তেনাছাদ্য ওঁ যা দিব্যা ইত্যনুমন্ত্র্য সংশ্রবসহিতং পাত্রং ওঁ প্রেতায় স্থানমসি ইতি স্ববামে কুশোপরি ন্যুব্জং কুর্য্যাৎ। ততঃ ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতানি গন্ধপুষ্প ধূপদীপাছাদনানি ত্বামুপতিষ্ঠতাং। ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ। এষ তে দীপঃ এতত্তে আচ্ছাদনং ইতি প্রত্যেকং নিবেদয়েৎ। ততঃ প্রেতার্চ্চনং সম্পুর্ণং জাতমিতি পৃচ্ছেৎ। ওঁ সম্পুর্ণং জাতমিত্যনুজ্ঞাতঃ। শ্রাদ্ধীয়ান্নাদ্ঘৃতাক্তমন্নমাদায় ওঁ অমুক গোত্রায় প্রেতামুক দেবশর্ম্মণে স্বাহা। ইতি বিপ্রপাণৌ জলে বা একাহুতিং জুহুয়াৎ। ততো ব্রাহ্মণাগ্রস্থিত কুশাদিকমপনীয় নৈর্ঋতীমারভ্য দক্ষিণাগ্রস্তয়া জলরেখয়া

বৃত্তমণ্ডলং কৃত্বা তত্র সলিলাদ্দর্ভান্ ন্যস্য তদুপরি ভোজনপাত্রং নিধায়ান্নাদিকং যথাসম্ভবং পাত্রান্তরিত হস্তাভ্যাং পরিবেশ-
য়েৎ। উপকরণঞ্চ পাত্রান্তরে কৃত্বা ভূমৌ স্থাপয়েৎ। এবং জলঞ্চ পাত্রান্তরে দদ্যাৎ। পাত্রান্তরাসত্ত্বে ভোজনপাত্রোপরি-
দদ্যাৎ। ততো ঘৃতশেষং কিঞ্চিৎ অন্নোপরি দদ্যাৎ। অনুত্তান হস্তাভ্যাং পাত্রং ধৃত্বা ওঁ পৃথিবী তে পাত্রমিত্যালভ্য ইদং বিষ্ণু-
র্বিচক্রমে ইত্যনেনান্নমঙ্গুষ্ঠং নিবেশ্য ওঁ বিষ্ণো কব্যং রক্ষস্বেত্যভ্যুক্ষ্য ওঁ অপহতেতি তিলান্ বিকীর্য্য ব্রাহ্মণে জলগণ্ডূষং
দত্ত্বা বাম হস্তেনান্নপাত্রং ধৃত্বা দক্ষিণ হস্তেন সতিল জলন্যাদায় ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নিদমন্নং সোপকরণং সজলং
স্বামুপতিষ্ঠতাং ইত্যুৎসৃজ্য ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা হন্নে মধুসর্পিষী আসিচ্য উপবীতী গায়ত্রীং ওঁ মধুবাতেতি মধু মধু মধ্বিতি
চ। ওঁ অন্নহীনং ক্রিয়াহীনমিতি জপ্ত্বা ওঁ ইদমন্নং ইমা আপঃ ইদং হবিঃ এতান্যুপকরণানি ইতি নিবেদ্য ওঁ ভগবান্ প্রাশ- ৫৩১
য়তু ইত্যাপোশানং দত্ত্বা ওঁ যথাসুখং জুষস্বেতি বদেৎ। ততো ভুঞ্জানে তস্মিন্ শ্রাব্যং পঠেৎ। যথা সপ্রণবাং ব্যাহৃতিকাং
গায়ত্রীং ওঁ অক্ষন্নমীমদন্তেতি ওঁ মধুবাতেতি ওঁ যজ্ঞেশ্বরো হব্যেতি ওঁ যোগীশ্বরমিতি যাজ্ঞবল্ক্য শ্লোকত্রয়ং ওঁ তদ্বিষ্ণোরিতি
ওঁ দুর্য্যোধনোমন্যুময়েতি ওঁ সপ্তব্যাধেতি ওঁ ঈশান বিষ্ণু কমলাসন রুদ্রেতি। ততস্তং তৃপ্তং জ্ঞাত্বা ওঁ মধুবাতেতি ওঁ অক্ষন্নমীতি
শ্রাবয়েৎ। ততঃ সম্পন্নমিতি পৃচ্ছেৎ ওঁ সম্পন্নমিতি তেনোক্তে সর্ব্বস্মাৎ কিঞ্চিদুদ্ধৃত্য। হুতাবশিষ্টেন সহ একীকৃত্য পিণ্ডার্থং
প্রভূততরং বিকীরণার্থং স্বল্পং পৃথক স্থাপয়েৎ। ওঁ শেষমন্নং ক দেয়মিতি পৃচ্ছেৎ ওঁ ইষ্টৈঃ সহ ভুজ্যতামিত্যনুজ্ঞাতঃ উত্তরা-
পোশানার্থং ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা। অথ পিণ্ডদানমহং। তত্রক্রমঃ ওঁ পিণ্ডদানমহং করিষ্যে। ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি অনু-

তাম্বূলাদি দত্ত্বা দক্ষিণাং কুর্য্যাৎ। ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো হশৌচান্তাদ্দ্বিতীয়েহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ কৃতৈতদাদ্যৈকোদ্দিষ্টশ্রাদ্ধ কর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণাং রজতমূল্যং যথা সম্ভবগোত্রনাম্নে ব্রাহ্মণায়াহং দদানীতি দক্ষিণাং দদ্যাৎ। ততঃ প্রিয়োক্তিভি র্ব্রাহ্মণং পরিতোষ্য ওঁ শ্রাদ্ধমিদং সম্পূর্ণং জাতমিতি বদেৎ। ওঁ জাতমিতি প্রতিবচনং। ওঁ অভিরম্যতামিতি ব্রাহ্মণং বিসর্জ্জয়েৎ। অভিরতোস্ম ইত্যুক্ত্বা স উপতিষ্ঠেৎ। ওঁ আমাবাজস্যেতি বারিধারয়া বেষ্টয়ন্ প্রণমেৎ। ততঃ কৃতাঞ্জলিঃ ব্রাহ্মণ হস্তে অক্ষতপুষ্পাণি দত্ত্বা ওঁ দাতারো নোভিবর্দ্ধন্তাং বেদাঃ সন্ততি রেব চ শ্রদ্ধা চ নো মাব্যগমদ্বহুদেয়ঞ্চ নোস্ত্বিতি। ততো গায়ত্রীং দেবতাভ্য ইতি ত্রিঃ পঠেৎ শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণে দদ্যাজ্জলে বা ক্ষিপেৎ। দক্ষিণপাণিনা দীপমাচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্য অদ্যেত্যাদি কৃতৈতাদ্যৈকোদ্দিষ্টশ্রাদ্ধ কর্ম্মাছিদ্রমস্ত্বিত্যবধার্য্য বিষ্ণুং স্মরেৎ॥ * ॥ * ॥ * ॥ 

ইত্যাদ্যৈকোদ্দিষ্টশ্রাদ্ধ প্রয়োগঃ এবমেব দ্বাদশমাসিকানি কুর্য্যাৎ॥ * ॥ * ॥

অথ নিত্যশ্রাদ্ধ প্রয়োগঃ ॥ * ॥ তত্র দক্ষিণামুখঃ কৃতপাদশৌচ আচান্তো দর্ভযুক্তাসনোপবিষ্টঃ তিলতৈলেন দীপং প্র-
জ্বাল্য ওঁ বাস্তুপুরুষায় নমঃ। ইতি বাস্তুং সংপূজ্য যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং দত্ত্বা পরকীয় ভূমৌ চেৎ ইদমন্নং ওঁ
এতদ্ভূস্বামি পিতৃভ্যঃ স্বধেত্যনেন প্রাচীনাবীতী দক্ষিণামুখঃ পিতৃতীর্থেন ভুগ্নকুশত্রয়েণ দক্ষিণাগ্রকুশত্রয়োপরি দদ্যাৎ। সর্ব্ব-
পিতৃকৃত্যং দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী পিতৃতীর্থেন কুর্য্যাৎ। সনকাদিকৃত্যং পশ্চিমাভিমুখঃ পাতিত দক্ষিণ-
জানুর্নিবীতী কায়তীর্থেন কুর্য্যাৎ। দক্ষিণদিশি তিলোদকপ্রোক্ষিত দক্ষিণাগ্র দর্ভযুক্তাসনদ্বয় মুপকল্প্য তত্র দর্ভবটুদ্বয়ং উদ-
ঙ্মুখং নিধায় পশ্চিমদিশি পশ্চিমাগ্রদর্ভযুক্তাসনে তথাবিধং দর্ভবটুং প্রাঙ্মুখং নিধায় পিতৃপক্ষে ওঁ এতত্তে পাদ্যং স্বধেতি
পাদ্যাদিকং মাতামহপক্ষে চ দত্ত্বা সনকাদিপক্ষে ওঁ এতদ্বঃ পাদ্যাদিকং হন্তেতি পাদ্যাদিকং দদ্যাৎ। ততঃ পিতৃপক্ষে ব্রাহ্ম-
ণায় জলং দত্ত্বা ওঁ অদ্যামুকে মাস্যমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ঽমুক গোত্রস্য পিতামহস্যা-
মুক দেবশর্ম্মণো ঽমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণো নিত্যশ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে ইতি বদেৎ। ওঁ কুরু-
ষ্বেতি প্রতিবচনম্। এবং মাতামহপক্ষেঽপি। সনকাদিপক্ষে ব্রাহ্মণায় জলং দত্ত্বা ওঁ অদ্যেত্যাদি সনক সনন্দ সনাতন কপিলা-
সুরিবোঢ়ুপঞ্চ শিখানাং দিব্যমনুষ্যাণাং নিত্যশ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে ইতি বদেৎ। ওঁ কুরুষ্বেতি প্রতিবচনম্। ততঃ
সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ত্রির্জপেৎ। ততো দেবতাভ্য ইতি ত্রিঃ পঠেৎ। ততো মন্ত্রজলেন শ্রাদ্ধীয়দ্রব্য প্রোক্ষণং কর্ত্তব্যং
রক্ষার্থ মুদকপাত্রমেকদেশে স্থাপয়েৎ। ততঃ পিতৃপক্ষে ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নমুক

গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নেতত্তে কুশাসনং ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইত্যনেন ব্রাহ্মণবামপার্শ্বে দদ্যাৎ। এবং মাতামহপক্ষেঽপি। সনকাদিপক্ষে জলং দত্ত্বা ওঁ সনক সনন্দ সনাতন কপিলাসুরিবোঢ়ু পঞ্চশিখা দিব্যমনুষ্যা এতদ্বঃ কুশাসনং হন্ত ইতি কুশাসনং দদ্যাৎ। ততঃ পিতৃপক্ষে ওঁ অদ্যামুক গোত্র পিতরমুক দেবশর্ম্মন্নমুক গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নেতানি তে গন্ধপুষ্প ধূপদীপাচ্ছাদনানি ওঁ যে চাত্র ত্বামিত্যাদিনা উৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্তে আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। এবং মাতামহপক্ষেঽপি। সনকাদিপক্ষে ওঁ সনক সনন্দ সনাতন কপিলাসুরিবোঢ়ু পঞ্চশিখা দিব্যমনুষ্যা এতানি বো গন্ধপুষ্প ধূপদীপাচ্ছাদনানি হন্ত ইত্যুৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপঃ এষ বো দীপ এতদ্ব আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। ততঃ পিতৃপক্ষে নৈর্ঋতীমারভ্য বামাবর্ত্তেন জলেন চতুষ্কোণমণ্ডলং কৃত্বা তদুপরি পাত্রং নিধায়ান্নাদিকং পাত্রান্তরিত হস্তাভ্যামুপবেশ্য বামহস্তেন পাত্রং ধৃত্বা অন্নং সংপ্রোক্ষ্য ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে ইতি মন্ত্রং পঠিত্বা ইদং হবিরিত্যুক্ত্বা ওঁ অপহতা সুরারক্ষাংসি বেদিষদ ইতি তিলান্ বিকীর্য্য ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং জপ্ত্বা মধুবাতা ইত্যনেন মধু দত্ত্বা ওঁ মধু মধ্বিতি চ পঠিত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নমুক গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নেতত্তে হন্নং সোপকরণং ওঁ যে চাত্র ত্বামিতি উৎসৃজেৎ। এবং মাতামহপক্ষেঽপি। সনকাদিপক্ষে মধুজপান্তং কর্ম্ম কৃত্বা ওঁ সনক সনন্দ সনাতন কপিলাসুরিবোঢ়ু

পঞ্চশিখা বিদ্যমনুষ্যা এতদ্বঃ সোপকরণমন্নং হন্তু ইতি বদেৎ। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ত্রিঃ সকৃদ্বা ওঁ মধুবাতে-
ত্যাদি ওঁ মধু মধ্বিতি চ জপেৎ। ততঃ ওঁ অন্নহীনং ক্রিয়াহীনং বিধিহীনঞ্চ যদ্ভবেৎ। তৎসর্ব্বমচ্ছিদ্রমস্ত্বিতি পঠিত্বা শ্রাব্যং
পঠেৎ। তদ্যথা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং মধুবাতেত্যৃচং মধু মধ্বিতি চ ওঁ যজ্ঞেশ্বরো হব্য সমস্ত কব্য ভোক্তাব্যয়াত্মা হরি-
রীশ্বরোঽত্র। তৎসন্নিধানাদপযান্তু সদ্যো রক্ষাংস্যশেষান্যসুরাশ্চ সর্ব্বে। ইতি জপেৎ। ততো দক্ষিণাগ্রান্ কুশানাস্তীর্য্য সতি-
লোদকেন তান্ প্রোক্ষ্য সর্ব্বপ্রকার মন্নমুদ্ধৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যেঽপ্যদগ্ধাঃ কুলে মম ইত্যাদি মন্ত্রদ্বয়ং
পঠিত্বা কুশোপরি বিকীরেৎ ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণ শ্রবণং স্পৃষ্ট্বা হরিং স্মৃত্বা ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা পূর্ব্ব
বদ্গায়ত্রীং মধুবাতেতি মধু মধ্বিতি চ জপেৎ ওঁ সুস্রোক্ষিতমস্তু ইতি ব্রাহ্মণাগ্রভূমিং সিঞ্চেৎ। ওঁ অস্ত্বিতি প্রতিব- ৫৩৭
চনম্। ওঁ শিবা আপঃ সন্তু ইতি ব্রাহ্মণেভ্যঃ জলং দদ্যাৎ। ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ সৌমনস্যমস্তু ইতি পুষ্পং দদ্যাৎ।
ওঁ অস্ত্বিতি প্রতিবচনম্। ওঁ অক্ষতঞ্চারিষ্টমস্ত্বিতি অক্ষতং দদ্যাৎ। অস্ত্বিতি প্রতিবচনম্। ততস্তিলমাজ্যলাজমধুযুক্তং জলং গৃহীত্বা
ওঁ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো দত্তমিদমন্ন পানাদিকমক্ষয্যমস্ত্বিতি দদ্যাৎ। এবমেব পিতামহাদি পঞ্চভ্যো দদ্যাৎ।
ততঃ ওঁ অঘোরাঃ পিতরঃ সন্ত্বিতি বদেৎ। ওঁ স্বস্ত্বিতি প্রতিবচনম্ ওঁ গোত্রং নো বর্দ্ধতামিতি বদেৎ। ওঁ বর্দ্ধতামিত্যু-
ত্তরম্। ততো দক্ষিণা যথা। ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ঽমুক গোত্রস্য পিতামহস্যামুক দেব-
শর্ম্মণো ঽমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ কৃতৈতন্নিত্যশ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং চন্দ্রদৈবতং তন্মূল্যং

বা বিষ্ণুদৈবং যথাসম্ভব গোত্রনাম্নে ব্রাহ্মণায়াহং দদানীতি দদ্যাৎ। দক্ষিণাদানে ফলাধিক্যং দক্ষিণারহিতেঽপি ন দোষঃ। এবং মাতামহপক্ষেঽপি। সনকাদিপক্ষে ওঁ অদ্যেত্যাদি সনক সনন্দ সনাতন কপিলাসুরিবোঢ়ু পঞ্চশিখানাং দিব্যমনুষ্যাণাং কৃতৈতৎনিত্যশ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনমগ্নিদৈবতং তন্মূল্যং বা বিষ্ণুদৈবতং হন্ত। ততঃ প্রাঙ্মুখঃ কৃতাঞ্জলিঃ সুমনাস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ ব্রাহ্মণান্ যাচেত। ওঁ দাতারো নোঽভিবর্দ্ধন্তামিতি। ওঁ সন্ত্বিতি প্রতিবচনম্। ততঃ প্রাচীনাবীতী। ওঁ দেবতাভ্য ইতি ত্রিঃ পঠেৎ। ওঁ বাজে বাজে বতেত্যাদিনা মন্ত্রেণ কুশাগ্রেণ ব্রাহ্মণান্ বিসর্জ্জয়েৎ। ততঃ ওঁ আ মা বাজস্যেত্যাদিনা দক্ষিণাবর্ত্তবারিধারয়া ব্রাহ্মণান্ বেষ্টয়েৎ প্রণমেচ্চ। ততো বামদেব্যগানং গানাশক্তৌ ত্রিধা ঋচং পঠেৎ ॥ * ॥ * ॥ ইতি সামবেদিনাং নিত্যশ্রাদ্ধ প্রয়োগঃ ॥ * ॥ * ॥ 

॥ * ॥ ইতি শ্রাদ্ধকাণ্ডং সমাপ্তম্ ॥ * ॥

॥ * ॥ অথ বলীনাং প্রয়োগঃ ॥ * ॥

অথ বৈশ্বদেববলিকর্ম্মণী ॥ * ॥ প্রাগুদক্প্লবনে দেশে সমে বা গোময়োপলিপ্তে স্বগৃহ্যোক্তবিধিনা অগ্নিং সংস্থাপ্য তদশক্তৌ পাত্রস্থ জলে বা প্রাঙ্মুখ উপবীতী পবিত্রপাণির্দর্ভযুক্তাসনোপবিষ্টঃ পাতিতদক্ষিণজানুরন্তর্জানুকরঃ সাঙ্গুষ্ঠেনোত্তানপাণিনা দেবতীর্থেন ঘৃতাক্তং তৈলাক্তং বা অন্নং আমান্নং ফলাদিকং জলং বা জুহুয়াৎ। যথা ওঁ ভূঃ স্বাহা। ওঁ ভুবঃ স্বাহা। ওঁ স্বঃ স্বাহা। ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ওঁ দেবকৃতস্যৈনসো ঽবযজনমসি স্বাহা। ওঁ পিতৃকৃতস্যৈনসো ঽবযজনমসি স্বাহা। ওঁ মনুষ্যকৃতস্যৈনসো ঽবযজনমসি স্বাহা। আত্মকৃতস্যৈনসো ঽবযজনমসি স্বাহা। ওঁ যদ্দিবা চ নক্তঞ্চৈনশ্চ কৃতং তস্যাবযজনমসি স্বাহা। ওঁ যৎ স্বপতশ্চ জাগ্রতশ্চৈনশ্চ কৃতমস্যাবযজনমসি স্বাহা। যদ্বিদ্বাংশ্চাবিদ্বাংশ্চৈনশ্চ কৃতমস্যাবযজনমসি স্বাহা। ওঁ এনস এনসো ঽবযজনমসি স্বাহা। ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা ॥ * ॥ * ॥ * ॥ * ॥ ৫৩৯

অথ বলীনাং প্রয়োগঃ। বৈশ্বদেবপশ্চাদ্ভূমৌ জলং ক্ষিপ্ত্বা তচ্ছেষান্নেন সাঙ্গুষ্ঠেন দৈবতীর্থেন। ওঁ বিশ্বেভ্যো দেবেভ্যো নমঃ। ইতি বলিং দদ্যাৎ। তদুপরি জলমনেন মন্ত্রেণ দদ্যাৎ। তদুত্তরে জলং ক্ষিপ্ত্বা ওঁ সর্ব্বেভ্যো ভূতেভ্যো নমঃ ইতি বলিং দত্ত্বা তদুপরি জলং দদ্যাৎ। ততো দক্ষিণে দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী দক্ষিণাগ্রকুশোপরি সতিলমন্নং দ্বিগুণভুগ্নকুশত্রয়েণ পিতৃতীর্থেন ওঁ পিতৃভ্যঃ স্বধেত্যনেন দদ্যাৎ। তদুপরি জলঞ্চ দেয়মিতি। তত উপবীতী দেবতীর্থেন বলিপাত্রপ্রক্ষালনোদকান্নেন ঐশান্যাং যক্ষৈতত্তে নমস্তে ঽস্তু মা মা হিংসীঃ। ওঁ যক্ষ্মণে নমঃ। ইত্যনেন বলিং দদ্যাৎ। জলঞ্চ দেয়ম্। ইত্যাবশ্যকবলিঃ। অথ কাম্যবলিঃ। বলীনাং পশ্চিমে জলেন উত্তরাগ্রাং রেখাং কৃত্বা উত্তরোত্তরক্রমতঃ ভূমৌ জলং

নিত্যশ্রাদ্ধকরণে পিত্র্যবলিতর্পণাভ্যাং পিতৃযজ্ঞসিদ্ধিঃ। বলিকরণাসামর্থ্যে পিতৃতর্পণাৎ পিতৃযজ্ঞসিদ্ধিঃ। পঞ্চযজ্ঞকরণাসামর্থ্যেণপি ব্রহ্মযজ্ঞতর্পণরূপপিতৃযজ্ঞয়োরনুষ্ঠানমাবশ্যকম্ ॥ * ॥ * ॥ * ॥

অথ গোগ্রাসঃ। প্রাঙ্মুখঃ পরস্য স্বস্য বা গবে সান্নগ্রাসং গ্রাসদ্রব্যং বা গৃহীত্বা ওঁ সৌরভেয্যঃ সর্ব্বহিতাঃ পবিত্রাঃ পুণ্যরাশয়ঃ প্রতিগৃহ্ণন্তু মে গ্রাসং গাবস্ত্রৈলোক্যমাতরঃ॥ ইত্যনেন দদ্যাৎ। ততঃ ওঁ নমো গোভ্যঃ শ্রীমতীভ্যঃ সৌরভেয়ীভ্য এব চ। নমো ব্রহ্মসুতাভ্যশ্চ পবিত্রাভ্যো নমো নমঃ॥ * ॥ ইতি নমস্কুর্য্যাৎ ॥ * ॥ * ॥

অথ গ্রহযাগঃ ॥ * ॥ অত্র রবি সোম বুধ গুরু শুক্র বারেষু চিত্রানুরাধা মৃগশিরো রেবতী পুষ্যাশ্বিনীহস্তারোহিন্যুত্তরা-ত্রয়েষু চন্দ্রতারানুকূলে শুভলগ্নে গ্রহযাগঃ কর্ত্তব্যঃ। অত্র বালগ্রহনবাধিপবলতরশত্রুদুঃসহরোগাভিভবাদ্ভুতদুঃস্বপ্নাবগ্রহগ্রহদো-ষ্যাদি নিমিত্তকং মলমাসাদিকালদ্ধাবপি কার্য্যম্। অবগ্রহং বিনা বৃষ্ট্যায়ুঃপুষ্টিপুত্র শ্রীকামাদিপৌষ্টিকন্তু মলমাসাদীতরত্র কালশুদ্ধৌ কর্ত্তব্যম্। তত্র যজমানঃ কৃতস্নানাদি গোময়োপলিপ্তে দেশে দর্ভাসনোপবিষ্ট উদঙ্মুখঃ ফলপুষ্পতিলদর্ভত্রয়সহিত জল পূর্ণং তাম্রপাত্রং গৃহীত্বা স্বস্তিবাচনং কৃত্বা ওঁ সূর্য্যঃ সোম ইতি পঠিত্বা ওঁ তদ্বিষ্ণোরিত্যনেন বিষ্ণুং স্মৃত্বা ওঁ তৎসদিত্যুচ্চার্য্য চান্দ্রমাসোল্লেখেন অদ্যামুকে মাসি অমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রঃ শ্রী অমুক দেবশর্ম্মা লাগ্নিকনাক্ষত্রিক দশান্তর্দ্দশাষ্টবর্গ গোচরকেতূপতাকাদ্যশুদ্ধগ্রহসংসূচ্যমানসংসূচয়িষ্যমাণারিষ্টপ্রশমনশুভগ্রহবিশেষসন্তোষপ্রতিপাদনকামো রব্যাদিনবগ্রহপূজাতদুদ্দে-শ্যক ঘৃতমধুমিশ্রতার্কাদিসমিধাহুতিক হোমকর্ম্মণী অহং করিষ্যে ইতি সংকল্প্য অথবা অদ্যেত্যাদি অমুক গোত্রঃ শ্রী অমূক দেবশর্ম্মা অমুক কামঃ গ্রহযজ্ঞমহং করিষ্যে ইতি সংকল্প্য তজ্জলমৈশান্যান্দিশি ক্ষিপেৎ। প্রতিনিধিনা অমুক গোত্রস্যামুক কামনয়া করিষ্যামীতি বিশেষঃ। ততো যজুর্ব্বেদী ওঁ যজ্জাগ্রতো দূরমিতি ইতরস্তু ওঁ দেবো ব ইতি পঠেৎ। তত ওঁ বেতালশ্চেতি মন্ত্রেণ ওঁ বিনায়কা বিঘ্নকরা ইতি মন্ত্রেণ চ শ্বেতসর্ষপবিক্ষেপৈর্বিঘ্নকরানপসর্পয়েৎ। ততঃ ষোড়শমাতৃ-কা পূজাবসুধারাসম্পাতলায়ুষ্য সূক্তজপাভ্যুদয়িক শ্রাদ্ধানি কৃত্বা শ্রাদ্ধাশক্তৌ ভোজ্যদানানি কৃত্বা গন্ধাদিনা ব্রাহ্মনান্ পরিতোষ্য উত্তরাভিমুখানুপবেশ্য ওঁ কর্ত্তব্যে ঽস্মিন্ গ্রহযাগকর্ম্মণি ওঁ পুণ্যাহং ভবন্তো ব্রবন্তু ইতি ত্রিঃ শ্রাবয়েৎ। তে চ পুণ্যাহমিতি

ত্রির্ব্রূয়ুঃ। এবং কর্ত্তব্যে ঽস্মিন্ গ্রহযাগকর্ম্মণি ওঁ স্বস্তি ভবন্তো ব্রুবন্তু ইতি ত্রিঃ শ্রাবয়েৎ। তে চ স্বস্তীতি ত্রির্ব্রূয়ুঃ।
ওঁ কর্ত্তব্যে ঽস্মিন্ গ্রহযাগকর্ম্মণি ওঁ ঋদ্ধিং ভবন্তো ব্রুবন্তু ইতি ত্রিঃ শ্রাবয়েৎ। তে চ ঋদ্ধ্যতামিতি ত্রির্ব্রূয়ুঃ। স্ত্রীশূদ্রকর্ত্তৃত্বে তু
নিরোঙ্কারবচনমিতি বিশেষঃ। ততঃ স্বয়মশক্তৌ প্রাঙ্মুখং উদঙ্মুখং ব্রাহ্মণং ওঁ সাধু ভবানাস্তামিতি বদেৎ। ওঁ সাধ্বহমাসে
ইতি প্রতিবচনম্ ওঁ অর্চ্চয়িষ্যামো ভবন্তং ইতি অর্চ্চয় ইতি বদেৎ। ওঁ অর্চ্চয় ইতি প্রতিবচনম্। ততো গন্ধপুষ্পবস্ত্রাঙ্গুরীয়কাদিনা
ব্রাহ্মণং পরিতোষ্য সপুষ্পাক্ষতদক্ষিণ হস্তেন দক্ষিণং জানুং ধৃত্বা ওঁ অদ্যেত্যাদি গ্রহযাগকর্ম্মণি ব্রহ্মকরণয়ামুক গোত্রং শ্রী
অমুক দেবশর্ম্মাণং গন্ধাদ্যর্চ্চিতং ভবন্তমহং বৃণে ইতি বদেৎ ওঁ বৃতো ঽস্মীতি প্রতিবচনম্। ওঁ যথাবিহিতং ব্রতকর্ম্ম
কুরু ইতি বদেৎ। ওঁ যথাজ্ঞানং করবাণীতি প্রতিবচনম্। এবং হোতৃতন্ত্রধারকসদস্যবরণমপি কার্য্যম্ ততঃ অস্মিন্ সময়ে 
সপল্লব কলসত্রয়ং স্থাপয়েৎ। যথা আজিঘ্র কলসং মহ্যা ত্বাবিশন্ত্বিন্দবঃ পুনরূর্জ্জা নিবর্ত্তস্ব সা নঃ সহস্রং ধুক্ষোরুধারা পয়
স্বতী পুনর্মা বিশতাদ্রয়িঃ। ইত্যেকং। ওঁ বরুণস্যোত্তম্ভনমসি বরুণস্য স্কম্ভঃ সর্জ্জনীস্থঃ। বরুণস্য ঋত সদন্যসি বরুণস্য ঋত
সদনীমাসীদ। ইত্যপরং। ওঁ সর্ব্বতীর্থোদ্ভবং বারি কুঙ্কুমেনাতিশীতলম্। আরোপয়াম্যহং দেবি প্রসীদ ভগবত্যুমে॥ ইত্য-
পরং। তত্র গণেশাদিপঞ্চদেবতাকান্ সংপুজ্য বিষ্ণুং ধ্যাত্বা ওঁ তদ্বিষ্ণোরিতি মন্ত্রেণ ষোড়শোপচারৈর্বিষ্ণুং সংপূজ্য স্থানান্তরে
বল্যর্থমন্নং পায়সং যাবকং কৃষরং ছাগমাসং চিত্রৌদনঞ্চ পক্ত্বা স্থাপয়িত্বা প্রকৃতং কর্ম্ম কুর্য্যাৎ। যথা মণ্ডপোত্তরপূর্ব্বভাগে
বিতস্তিদ্বয়মিত বিস্তৃতায়াং বিতস্তিমিতোচ্ছ্রায়ায়ামুদকপ্লবনায়াং গোময়োপলিপ্তায়াং গ্রহবেদ্যাং চক্রাব্জমণ্ডলে রক্তচন্দনাদিনা

মধ্যে বর্ত্তুলং রক্তং পূর্ব্বাস্যং সূর্য্যম্ ॥ ১ ॥ আগ্নেয্যাং শ্বেতমর্দ্ধচন্দ্রং দক্ষিণামুখং সোমম্ ॥ ২ ॥ দক্ষিণস্যাং ত্রিকোণ-
রক্তং পশ্চিমাস্যং মঙ্গলম্ ॥ ৩ ॥ ঐশান্যাং পীতধনুরাকারং উত্তরাস্যং বুধম্ ॥ ৪ ॥ উত্তরস্যাং পীতং পদ্মাকারং উত্ত-
রাস্যং বৃহস্পতিম্ ॥ ৫ ॥ প্রাচ্যাং শ্বেতং চতুষ্কোণং পূর্ব্বাস্যং শুক্রম্ ॥ ৬ ॥ প্রতীচ্যাং দণ্ডাকারং কৃষ্ণবর্ণং দক্ষিণাস্যং
শনিং ॥ ৭ ॥ নৈর্ঋত্যাং কৃষ্ণং মকরাকারং পশ্চিমাস্যং রাহুম্ ॥ ৮ ॥ বায়ব্যাং ধূম্রান্ রক্তমাল্যাম্বরধরান্ পশ্চিমা-
স্যান্ কেতূন্ বিলিখেৎ ॥ ৯ ॥ ততো মনোজ্যোতির্জুষতামাজ্যস্য বৃহস্পতির্যজ্ঞমিমং তনোত্বরিষ্টং যজ্ঞং সমিমং দধাতু বিশ্বে
দেবাস ইহ মাদয়ন্তামোঁ প্রতিষ্ঠ। ইত্যনেন প্রত্যেকং প্রাণপ্রতিষ্ঠং কৃত্বা অগ্নিস্থাপনং কুর্য্যাৎ। যথা স্বগৃহোক্তবিধিনা ব্রহ্ম-
স্থাপনান্তং কর্ম্ম কৃত্বা মণ্ডলেষু গ্রহানাবাহয়েৎ। তত্র ক্রমঃ। মধ্যে ক্ষত্রিয়ং কাশ্যপং রক্তং কালিঙ্গং দ্বাদশাঙ্গুলম্। পদ্মহস্ত-
দ্বয়ং পূর্ব্বাননং সপ্তাশ্ববাহনং। শিবাধিদৈবতং সূর্য্যং বহ্নিপ্রত্যধিদৈবতং। সপ্তম্যাং জাতং বিশাখানক্ষত্রম্। ইতি ধ্যাত্বা ওঁ
ভূর্ভুবঃ স্বঃ সূর্য্য ইহা গচ্ছ ইহা গচ্ছ ইহ তিষ্ঠ ইহ তিষ্ঠ শুক্লতণ্ডুলৈরাবাহ্য স্থাপয়েৎ। আগ্নেয্যাং সামুদ্রং বৈশ্যমাত্রেয়ং
হস্তমাত্রং সিতাম্বরম্। শ্বেতং দ্বিবাহুং বরদং দক্ষিণস্যাধিদৈবতম্। জলপ্রত্যধিদৈবঞ্চ সূর্য্যাস্যমাহ্বয়েত্তথা। চতুর্দ্দশ্যাং জাতং
কৃত্তিকানক্ষত্রম্। ইতি ধ্যাত্বা পূর্ব্ববদাবাহ্য স্থাপয়েৎ ॥ ২ ॥ দক্ষিণস্যাম্। আবন্তং ক্ষত্রিয়ং রক্তং মেষস্থং চতুরঙ্গুলম্।
আরক্তমাল্যবসনং ভারদ্বাজং চতুর্ভুজম্। আদিত্যাভিমুখং দেবং তদ্বদেব সমাহ্বয়েৎ। স্কন্দাধিদৈবতং ভৌমং ক্ষিতিপ্রত্যধি-
দৈবতম্। দশম্যাং জাতং পূর্ব্বাষাঢ়ানক্ষত্রম্। ইতি ধ্যাত্বা পূর্ব্ববদাবাহ্য স্থাপয়েৎ ॥ ৩ ॥ ঐশান্যাম্। মাগধং দ্ব্যঙ্গুলাত্রেয়ং

বৈশ্যং পীতং চতুর্ভুজং। বামোর্দ্ধক্রমতশ্চর্ম্মগদাবরদখড়্গিনং। সূর্য্যাসং সিংহগং সৌম্যং পীতবস্ত্রং তথাহ্বয়েৎ। নারায়ণাধি-
দৈবঞ্চ বিষ্ণুপ্রত্যধিদৈবতম্। দ্বাদশ্যাং জাতং ধনিষ্ঠানক্ষত্রম্। ইতি ধ্যাত্বা পূর্ব্ববদাবাহ্য স্থাপয়েৎ॥ ৪ ॥ উত্তরস্যাং।
দ্বিজমাঙ্গিরসং পীতং সৈন্ধবঞ্চ ষড়ঙ্গুলং। ধ্যায়েৎ পীতাম্বরং জীবং সরোজস্থং চতুর্ভুজম্। দক্ষোর্দ্ধাদক্ষবরদকরকাদণ্ডমাহ্বয়েৎ।
ব্রহ্মাধিদৈবং সূর্য্যাস্যমিন্দ্রপ্রত্যধিদৈবতং। একাদশ্যাং জাতং উত্তরফল্গুনীনক্ষত্রং। ইতি ধ্যাত্বাবাহ্য পূর্ব্ববৎ স্থাপয়েৎ॥ ৫ ॥
প্রাচ্যাং শুক্রং ভোজকটং বিপ্রং ভার্গবঞ্চ নবাঙ্গুলং। পদ্মস্থমাহ্বয়েৎ সূর্য্যমুখং শ্বেতং চতুর্ভুজং। গদাক্ষবরকরকাদণ্ডহস্তং সিতা-
ম্বরমং। শক্রাধিদৈবতং ধ্যায়েচ্ছচীপ্রত্যধিদৈবতং। নবম্যাং জাতং পুষ্যানক্ষত্রম্। ইতি ধ্যাত্বা পূর্ব্ববদাবাহ্য স্থাপয়েৎ॥ ৬ ॥
পশ্চিমায়াং। সৌরাষ্ট্রং কাশ্যপং শূদ্রং সূর্য্যাস্যং চতুরঙ্গুলং। কৃষ্ণং কৃষ্ণাম্বরং গৃধ্রগতং শৌরিং চতুর্ভুজং। তদ্বদ্বাণবরং শূল-
ধনুর্হস্তং সমাহ্বয়েৎ। যমাধিদৈবতং প্রজাপতিপ্রত্যধিদৈবতম্ কৃষ্ণচতুর্দ্দশ্যাং জাতং রোহিণীনক্ষত্রং ইতি ধ্যাত্বা পূর্ব্ববদাবাহ্য
স্থাপয়েৎ॥ ৭ ॥ নৈর্ঋত্যাং। রাহুং মলয়জং শূদ্রং পৈঠীনং দ্বাদশাঙ্গুলং। কৃষ্ণ কৃষ্ণাম্বরং সিংহাসনং ধ্যাত্বা তথাহ্বয়েৎ।
চতুর্বাহুং খড়্গাবরশূলচর্ম্মকরন্তথা। কালাধিদৈবং সূর্য্যাসং সর্পপ্রত্যধিদৈবতং। পৌর্ণমাস্যাং জাতং ভরণীনক্ষত্রং। ইতি ধ্যাত্বা-
পূর্ব্ববদাবাহ্য স্থাপয়েৎ॥ ৮ ॥ বায়ব্যাং কৌশদ্বীপং কেতুগণং জৈমিনীয়ং ষড়ঙ্গুলং। সূর্য্যাস্যং ধূম্রবসনং বরদং গদিনং
তথা। চিত্রগুপ্তাধিদেবঞ্চ ব্রহ্মপ্রত্যধিদৈবতং। অমাবস্যায়াং জাতং অশ্লেষানক্ষত্রং। ইতি ধ্যাত্বা পূর্ব্ববদাবাহ্য স্থাপয়েৎ॥ ৯ ॥
অথাধিদৈবতানি। তত্র ক্রমঃ। সূর্য্যদক্ষিণে ত্র্যম্বকং॥ ১ ॥ সোমদক্ষিণে উমাং॥ ২ ॥ কুজদক্ষিণে স্কন্দং॥ ৩ ॥ বুধদক্ষিণে

হরিম্ ॥ ৪ ॥ বৃহস্পতিদক্ষিণে ব্রহ্মাণং ॥ ৫ ॥ শুক্রদক্ষিণে ইন্দ্রং ॥ ৬ ॥ শনিদক্ষিণে যমং ॥ ৭ ॥ রাহুদক্ষিণে কালং ॥ ৮ ॥
কেতুদক্ষিণে চিত্রগুপ্তং ॥ ৯ ॥ অথ প্রত্যধিদৈবতং। তত্র ক্রমঃ। সূর্য্যবামে অগ্নিং ॥ ১ ॥ সোমবামে অপঃ ॥ ২ ॥ কুজবামে
পৃথিবীং ॥ ৩ ॥ বুধবামে বিষ্ণুং ॥ ৪ ॥ বৃহস্পতিবামে ইন্দ্রং ॥ ৫ ॥ শুক্রবামে শচীং ॥ ৬ ॥ শনিবামে প্রজাপতিং ॥ ৭ ॥
রাহুবামে সর্পান্ ॥ ৮ ॥ কেতুবামে ব্রহ্মাণং ॥ ৯ ॥ এবং মণ্ডলদক্ষিণে বিনায়কং পশ্চিমায়াং গৌরীং বায়ব্যাং বায়ুং উত্তর-
স্যামাকাশং প্রাচ্যামশ্বিনৌ। ওঁ ভূর্ভুবঃ স্বরিত্যনেন প্রত্যেকমাবাহ্য স্থাপয়েৎ। অধিদৈবতপ্রত্যধিদৈবতপূজনন্তু যুতহোমাদৌ বোধ্যং।
ততঃ সূর্য্যাদিক্রমেণ তত্তদ্বর্ণবস্ত্রতত্তদ্বর্ণ গন্ধাদিলেপন তত্তদ্বর্ণ পুষ্পাণ্যাদায় এতদ্বস্ত্রং ওঁ সূর্য্যায় নমঃ ইদমাচমনীয়ং ইদং রজতা-
ভরণং এষ গন্ধঃ ত্রতৎ পুষ্পং এষ ধূপঃ এষ দীপঃ এষ গুড়ৌদনবলিঃ এবং ক্রমেণ সোমাদীনামপি পূজনং কার্য্যং। সূর্য্যায়
রক্তবস্ত্রং ॥ ১ ॥ সোমায় শুক্লবস্ত্রং ॥ ২ ॥ কুজায় রক্তবস্ত্রং ॥ ৩ ॥ বুধায় পীতবস্ত্রং ॥ ৪ ॥ বৃহস্পতয়ে পীতবস্ত্রং ॥ ৫ ॥ ৫৪৭
শুক্রায় শুক্লবস্ত্রং ॥ ৬ ॥ শনৈশ্চরায় কৃষ্ণবস্ত্রং ॥ ৭ ॥ রাহবে ধূম্রবস্ত্রং ॥ ৮ ॥ কেতবে ধূম্রবস্ত্রং ॥ ৯ ॥ বিহিত পুষ্পাভাবে
সর্ব্বেষাং শুক্লপুষ্পং। গন্ধে তু বিশেষঃ। সূর্য্যায় রক্তচন্দনং ॥ ১ ॥ সোমায় শ্বেতচন্দনং ॥ ২ ॥ মঙ্গলায় কুঙ্কুমানুলে-
পনং ॥ ৩ ॥ বুধায় শ্বেতচন্দনং ॥ ৪ ॥ বৃহস্পতয়ে চন্দ্রসোমানুলেপনং ॥ ৫ ॥ শুক্রায় শ্বেতচন্দনং ॥ ৬ ॥ শনৈশ্চরায় কস্তুর্য্য-
নুলেপনং ॥ ৭ ॥ রাহবে কৃষ্ণাগুর্ব্বনুলেপনং ॥ ৮ ॥ কেতবে পদ্মকাষ্ঠানুলেপনং ॥ ৯ ॥ তত্তদ্গন্ধানুলেপনাভাবে সর্ব্বেষাং শুক্ল-
চন্দনং ॥ ধূপে তু বিশেষঃ। সূর্য্যায় গুগ্‌গুলুধূপঃ ॥ ১ ॥ সোমায় সরলধূপঃ ॥ ২ ॥ মঙ্গলায় দেবদারুধূপঃ ॥ ৩ ॥ বুধায় ঘৃত-

দেবদারুধূপঃ ॥ ৪ ॥ বৃহস্পতয়ে দশাঙ্গধূপঃ ॥ ৫ ॥ শুক্রায়াগুরুধূপঃ ॥ ৬ ॥ শনৈশ্চরায় কৃষ্ণাগুরুধূপঃ ॥ ৭ ॥ রাহবে গুড়ত্বগ্ধূপঃ
॥ ৮ ॥ কেতবে সমধুগুড়ত্বক্ধূপঃ ॥ ৯ ॥ তদ্ধূপাভাবে সর্ব্বেষাং গুগ্গুলুধূপঃ। বলৌ তু বিশেষঃ। সূর্য্যায় গুড়ৌদনং ॥ ১ ॥
সোমায় ঘৃতপায়সং ॥ ২ ॥ মঙ্গলায় যাবকং ॥ ৩ ॥ বুধায় ক্ষীরান্নং ॥ ৪ ॥ বৃহস্পতয়ে দধ্যোদনং ॥ ৫ ॥ শুক্রায় ঘৃতৌদনং
॥ ৬ ॥ শনৈশ্চরায় কৃষরং ॥ ৭ ॥ রাহবে ছাগমাংসং ॥ ৮ ॥ কেতবে অজকর্ণরক্তমিশ্রিতদুগ্ধপক্কযবশালিতিলতণ্ডুলরূপচিত্রৌদনং
॥ ৯ ॥ যত্র যাবকাদিচতুর্দ্রব্যাভাবস্তত্র ভক্ষ্যান্তরং দদ্যাদিতি। গ্রহাণাং দক্ষিণপার্শ্বস্থান্ ত্র্যম্বকোমাস্কন্দবিষ্ণুব্রহ্মেন্দ্রযমকালচিত্র-
গুপ্তান্ বামপার্শ্বস্থান্ অগ্ন্যপপৃথিবীবিষ্ণ্বিন্দ্রশচীপ্রজাপতিসর্পব্রহ্মাণঃ পূজয়িত্বা মণ্ডলদক্ষিণাদিদিক্ষু বিনায়কগৌরীবায়্বাকাশা-
শ্বিনঃ পুষ্পাক্ষতৈঃ প্রত্যেকং পূজয়েৎ। ততস্ত্র্যম্বকাদিভ্যো ঘৃতপায়সং দদ্যাৎ। তত্র এতানি ভুবি ভক্ষ্যাণি অধিদৈবতপ্রত্য-
ধিদৈবতবিনায়কাদিপঞ্চসহিতেভ্যো নবগ্রহেভ্যো নমঃ ইত্যাদি গুড়াদিকং দদ্যাৎ। ততো মহাবেদ্যাং চক্রাজমণ্ডলে স্ব স্ব দিক্ষু
লোকপালান্ পূজয়েৎ। যথা।—ইন্দ্রস্তু মহসা দীপ্তঃ সর্ব্বদেবাধিপো মহান্। বজ্রহস্তো মহাসত্ত্বস্তস্মৈ নিত্যং নমো নমঃ।
ইতি মন্ত্রেণ সর্ব্বত্র প্রণবেন মহাব্যাহৃত্যা চ ইন্দ্রং সংস্থাপ্য সংপূজ্য উক্তক্রমেণ বলিং দদ্যাৎ। এবং ক্রমেণ সর্ব্বত্র। ওঁ
আগ্নেয়ঃ পুরুষো রক্তঃ সর্ব্বদেবময়োঽব্যয়ঃ। ধূমকেতুরনাধৃষ্যস্তস্মৈ নিত্যং নমো নমঃ। ইতি মন্ত্রেণ সংপূজ্য সংস্থাপ্য বলিং
দদ্যাৎ। ওঁ যমশ্চোৎপলবর্ণাভঃ কিরীটী দণ্ডধৃক্ সদা। ধর্ম্মসাক্ষী বিশুদ্ধাত্মা তস্মৈ নিত্যং নমো নমঃ। নির্ঋতিস্তু পুমান্
কৃষ্ণঃ সর্ব্বরক্ষোঽধিপো মহান্। খড়্গহস্তো মহাংশ্চাপি তস্মৈ নিত্যং নমো নমঃ। গৌরো যশ্চ পুমান্ সৌম্যঃ সর্ব্বৌষধিসম-

ন্বিতঃ। নক্ষত্রাধিপতিঃ সোমস্তস্মৈ নিত্যং নমো নমঃ। ঈশানং পুরুষঃ শুক্রঃ সর্ব্ববিদ্যাধিপো মহান্। শূলহস্ত বিরূপাক্ষ-
স্তস্মৈ নিত্যং নমো নমঃ। পদ্মযোনিশ্চতুর্ম্মূর্ত্তির্হৈমবাসা পিতামহঃ। যজ্ঞাধ্যক্ষশ্চতুর্ব্বক্তস্তস্মৈ নিত্যং নমো নমঃ। ওঁ যোঽসা-
বনন্তরূপেণ ব্রহ্মাণ্ডং সচরাচরম্। পুষ্পবদ্ধারয়েন্মূর্দ্ধ্নি তস্মৈ নিত্যং নমো নমঃ। ততঃ কুণ্ডস্যৈশান্যাং কুম্ভমশ্যামমব্রণং বহি
র্দধ্যক্ষতবিভূষিতং চূতাশ্বত্থন্যগ্রোধোড়ুম্বরপ্লক্ষপঞ্চপল্লবমুখং ফলবস্ত্রযুগবেষ্টিতগ্রীবং অন্তঃপ্রক্ষিপ্তসুবর্ণরজতমৌক্তিকরাজপট্টপ্রবালরূপ-
পঞ্চরত্নং অক্ষতানামুপরি ওঁ আজিঘ্র কলসং মহ্যা ত্বাবিশন্ত্বিন্দবঃ পুনরূর্জ্জা নিবর্ত্তস্ব সা নঃ সহস্রং ধুক্ষোরুধারা পয়স্বতী
পুনর্মা বিশতাদ্রয়ি ইতি মন্ত্রেণ স্থাপয়েৎ। ততো নাদেন জলেন ঘটং পূরয়িত্বা ওঁ বরুণস্যোত্তম্ভনমসি বরুণস্য স্কম্ভঃ সর্জনীস্থঃ
বরুণস্য ঋত সদনমসি বরুণস্য ঋতসদনীমাসীদেতি মন্ত্রেণ বরুণং ন্যসেৎ। ততোঽশ্বস্থানগজস্থানরথ্যাবল্মীকনদীসঙ্গমহ্রদগোকু- ৫৪২
লানাং সপ্ত মৃত্তিকাঃ সর্ব্বৌষধীশ্চ তত্র নিঃক্ষেপেৎ। ততশ্চরুং স্থাপিতাগ্নৌ শ্রপয়েৎ। তত্র সামগানাং ক্রমমাহ। অগ্নেঃ পশ্চি-
মায়াং দিশি প্রাগগ্রান্ কুশানাস্তীর্য্য তদুপরি প্রক্ষালিতবারুণমুদূখলং মুষলঞ্চ বৈণবং সূর্পং বারুণচমসঞ্চ জলপ্রোক্ষিতং সংস্থাপ্য
ব্রীহীন্ যবান্ বা অশক্তৌ তণ্ডুলান্ সূর্পে নিধায়। ওঁ সূর্য্যায় ত্বা জুষ্টং নির্বপামি এবং সোমায় ইত্যাদি। যজুর্ব্বেদী তু
ওঁ সূর্য্যায় ত্বা জুষ্টং গৃহ্ণামি ওঁ সূর্য্যায় ত্বা জুষ্টং নির্ব্বপামি ওঁ সূর্য্যায় ত্বা জুষ্টং প্রোক্ষামি। ঋগ্বেদিনাস্তু গ্রহণপ্রোক্ষণে
ততো ত্রিস্রুচীং গৃহীত্বা উদূখলে স্থাপয়েৎ। ততো দক্ষিণহস্তমুপরি কৃত্বা উদূখলেনাবহত্য সূর্পেণ প্রস্ফোটয়েৎ। ইত্থমেব বার-
ত্রয়ং কৃত্বা ত্রিঃ প্রক্ষালয়েৎ। ততশ্চরুস্থাল্যামমন্ত্রকং কৃতোত্তরাগ্রং পবিত্রং নিঃক্ষিপ্য তত্র প্রক্ষালিততণ্ডুলান্ নিধায় দুগ্ধং

দত্ত্বা যথা পায়সচরুর্ভবতি তথা স্তোকং স্তোকং দত্ত্বা তন্মধ্যে খদিরপলাশোড়ুম্বরাণামন্যতমস্য প্রাদেশপ্রমাণং সার্দ্ধাঙ্গুষ্ঠপর্ব্ব-
মিতং চতুষ্কোণপুষ্করং মেক্ষণং দক্ষিণাবর্ত্তেন ভ্রাময়িত্বা পচেৎ। যথান্তরুষ্মণা সম্যক্ পাকো ভবতি মণ্ডগালনং দাহনশ্চ ন ভবতি
সম্যক্ পাকে ভূতে মধ্যে ঘৃত শ্রুবন্দত্ত্বা প্রাগাদি দিকচিহ্নিতং চরুমবতার্য্যাগ্নেরুত্তরতঃ কুশোপরি স্থাপয়িত্বা পুনর্মধ্যে
ঘৃতশ্রুবন্দদ্যাৎ। ততো ভূমিজপাদিশ্রুবসংস্কারপর্য্যন্তং কর্ম্ম কৃত্বাগ্নেঃ পশ্চিমস্তরণকুশোপরি পূর্ব্বমাজ্যং পশ্চাচ্চরুং নিধায়
উদকাঞ্জলিষেকং কৃত্বা বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপয়েৎ। শান্তিকর্ম্মণি অগ্নে ত্বং বরদনামাসীতি নাম কৃত্বা ওঁ পিঙ্গ-
ভ্রূশ্মশ্রুকেশাক্ষঃ পীনাঙ্গজঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ সপ্তার্চ্চিঃ শক্তিধারকঃ। ইত্যাদিত্যপুরাণীয়ং ধ্যাত্বা বরদনা-
মগ্নে ইহাগচ্ছ ইহাগচ্ছ ইহ তিষ্ঠ ইহ তিষ্ঠ ইত্যাবাহ্য পাদ্যাদিভিঃ পূজয়েৎ। পৌষ্টিক কর্ম্মণি তু বলদনামাগ্নিঃ। ততঃ 
স্বগৃহোক্তবিধিনা সূর্য্যাদিগ্রহেভ্যঃ প্রত্যেকমেকাহুতিন্দদ্যাৎ। তত্র মন্ত্রাঃ। সূর্য্যস্য। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং
মর্ত্ত্যঞ্চ হিরণ্যয়েন সবিতা রথেনাদেবো যাতি ভুবনানি পশ্যন্ স্বাহা ॥ ১ ॥ সোমস্য। ওঁ ইমং দেবা অসপত্নং সুবদ্ধং মহতে ক্ষেত্রায় মহতে
জ্যৈষ্ঠায় ইমমমুমমুষ্য পুত্রমমুষ্যাঃ পুত্রমস্মৈ বিশে স্বাহা ॥ ২ ॥ মঙ্গলস্য। ওঁ অগ্নির্মূর্দ্ধা দিবঃ ককুৎপতিঃ পৃথিব্যা অয়মপাং রেতাংসি
জিন্বতি স্বাহা ॥৩॥ বুধস্য। উদ্বুধ্যস্বাগ্নে প্রতিজাগৃহি ত্বমিষ্টাপূর্ত্তে সংসৃজেথামরঞ্চ অস্মিন্ স্বধস্থে অধ্যুত্তরস্মিন্ বিশ্বেদেবা যজমানশ্চ সীদত
স্বাহা ॥৪॥ বৃহস্পতেঃ। ওঁ বৃহস্পতে অতিযদর্য্যো অর্হাৎদ্যুমদ্বিভাতি ক্রতুমজ্জনেষু যদ্দীদয়বচ্ছবসর্ত্তপ্রজাত তদস্মাসুদ্রবিণং ধেহি চিত্রং স্বাহা
॥৫॥ শুক্রস্য। ওঁ অন্নাৎ পরিশ্রুতো রসং ব্রহ্মণাব্যপিবৎ ক্ষত্রং পয়ঃ সোমং প্রজাপতিঃ। ঋতেন সত্যমিন্দ্রিয়ং বিপানং শুক্রমন্ধসঃ ইন্দ্রিয়-

সোমেন্দ্রিয়মিদং পয়োমৃতং মধু স্বাহা॥ শনৈশ্চরস্য। শন্নো দেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ স্বাহা॥ ৭॥
রাহোঃ ওঁ কাণ্ডাৎ কাণ্ডাৎ প্ররোহন্তী পরুষঃ পরুষঃ পরি এবা নো দূর্ব্বে প্রতনু সহস্রেণ শতেন চ স্বাহা॥ ৮ ॥ কেতূনাং
ওঁ কেতুং কৃণ্বন্নকেতবে পেশোমর্য্যা অপেশসে সমুষদ্ভিরজায়থা স্বাহা॥ ৯ ॥ ততো মধুঘৃতাভ্যাং দধ্যাক্তং দুগ্ধাক্তং বা প্রাদেশ
প্রমাণাং সাগ্রমর্কসমিধমাদায় ওঁ আকৃষ্ণেনেতি পূর্ব্বোক্তমন্ত্রেণ সূর্য্যস্যাষ্টোত্তরশতমষ্টাবিংশতিমষ্টৌ বা জুহুয়াৎ। গ্রহস্যাত্যন্ত
পীড়াকরণে অষ্টোত্তরসহস্রং জুহুয়াৎ। যস্তু পীড়াকরো নিত্যং তস্তু যত্নেন পূজয়েৎ॥ ১ ॥ এবং পলাশসমিধমাদায় ওঁ ইমং
দেবা অসপত্নং ইতি মন্ত্রেণ সোমায়॥ ২ ॥ খদিরসমিধং আদায় ওঁ অগ্নির্মূর্দ্ধেতি মন্ত্রেণ মঙ্গলায়॥ ৩ ॥ অপামার্গসমিধং
ওঁ উদ্বুধ্যস্বেতি মন্ত্রেণ বুধায়॥ ৪ ॥ অশ্বত্থসমিধং ওঁ বৃহস্পতে ইতি মন্ত্রেণ বৃহস্পতয়ে॥ ৫ ॥ উড়ুম্বরসমিধং ওঁ অন্নাৎ
পরিস্রুতঃ ইতি মন্ত্রেণ শুক্রায়॥ ৬ ॥ শমীসমিধং ওঁ শন্নো দেবীরিতি মন্ত্রেণ শনৈশ্চরায়॥ ৭ ॥ দূর্ব্বাদলাত্মিকাং সমিধং
ওঁ কেতুং কৃণ্বন্নিতি মন্ত্রেণ কেতুভ্যঃ॥ ৯ ॥ জুহুয়াদিতি সর্ব্বত্র যোজ্যম্॥ ততঃ স্বগৃহ্যোক্তবিধিনা শাট্যায়নহোমাদি বামদেব্য
গানান্তং উদীচ্যং কর্ম্ম কুর্য্যাৎ। ততঃ শান্তিকলসমাদায় যজমানভিষিঞ্চেৎ। যথা ওঁ উত্তিষ্ঠ ব্রহ্মণস্পতে দেবয়ন্তস্তেমহে উপ-
প্রয়ান্তু মরুতঃ সুদানব ইন্দ্রপ্রাশূর্ভবাসচা ইতি মন্ত্রেণ শান্তিকলসমুত্থাপ্য তজ্জলেন পঞ্চপল্লবমাদায়াচার্য্য ওঁ সুরাস্ত্বামভিষিঞ্চন্তু
ব্রহ্মবিষ্ণুমহেশ্বরাঃ ইত্যাদিনাভিষিঞ্চেৎ। ততস্তিলকং হুতশেষেণ দত্ত্বা দক্ষিণাং কুর্য্যাৎ। ওঁ যথা অদ্যেত্যাদি কৃতৈতৎ গ্রহযাগ
কর্ম্মণঃ সাঙ্গতার্থং দক্ষিণামিদং কাঞ্চনমূল্যং বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদে ইত্যনেন দক্ষিণান্দত্ত্বাচ্ছিদ্রবধারণং কুর্য্যাৎ।

যথা অদ্যেত্যাদি কৃতৈতৎগ্রহযাগকর্ম্মাচ্ছিদ্রমস্তু॥ ইত্যবধার্য্য অদ্যেত্যাদি কৃতে ঽস্মিন্ গ্রহযাগকর্ম্মণি যৎ কিঞ্চিদ্বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় বিষ্ণুস্মরণ মহং করিষ্যে ইতি সংকল্প্য ওঁ তদ্বিষ্ণোঃ পরমং পদমিতি বিষ্ণুং ধ্যাত্বা ওঁ গচ্ছধ্বমমরাঃ সর্ব্বে গৃহীত্বার্চ্চাং স্বমালয়ম্। সন্তুষ্টা বরমস্মাকং দত্ত্বেদানীং সুপূজিতাঃ। ইত্যনেন গ্রহান্ বিসর্জ্জয়েৎ। সা চ দক্ষিণা প্রত্যেকম্। যথা সূর্য্যস্য ধেনুঃ। চন্দ্রস্য শঙ্খঃ। মঙ্গলস্য বৃষঃ। বুধস্য হেমঃ। বৃহস্পতের্ব্বাসঃ। শুক্রস্য হয়ঃ। শনেঃ কৃষ্ণা গৌঃ। রাহোরায়সঃ খড়্গঃ। কেতোশ্ছাগঃ। তদশক্তৌ কাঞ্চনং। তথা চ ধেনুঃ শঙ্খস্তথানুড়্বান্ হেম বাসো হয়স্তথা। কৃষ্ণা গৌরায়সঃ খড়্গশ্ছাগশ্চ দক্ষিণা ক্রমাৎ। অর্কঃ পলাশঃ খদিরস্ত্বপামার্গোঽথ পিপ্পলঃ। উড়ুম্বরশমীদূর্ব্বাঃ কুশাশ্চ সমিধঃ ক্রমাৎ। বাক্যং যথাযথমূহ্যম্। ততঃ শান্তিকুম্ভোদকেন স্নানম্। যথাশক্তি ব্রাহ্মণভোজনম্॥ * ॥

॥ * ॥ * ॥ ইতি গ্রহযাগবিধিঃ॥ * ॥ * ॥

অথ বাস্তুযাগ প্রয়োগঃ। তত্র দেবগৃহারম্ভে চতুঃষষ্টিপদবাস্তুমণ্ডলম্। আদৌ প্রাগুক্ত দীপবর্ণে পরীক্ষিতাং ভূমিং দ্বিহস্তং চতুর্হস্তং জলান্তং বা খনিত্বা সংশোধ্য কালশুদ্ধৌ কর্ত্তুঃ শুভদিনে যজমানঃ কৃতস্নানাদি ওঁ তৎসদিত্যুচ্চার্য্য ওঁ অদ্যেত্যাদি অমুকে মাসি অমুক পক্ষে অমুক তিথৌ অমুক গোত্রঃ শ্রী অমুক দেবশর্ম্মা শ্রী বিষ্ণুগৃহারম্ভে এতদ্বাস্তু সর্ব্বদোষোপশমন কামো বাস্তুযাগ কর্ম্মাহং করিষ্যে। ইতি মুখ্যচান্দ্রমাসেন সঙ্কল্পয়েৎ। ততো দেবো ব ইতি পঠেৎ। এবমন্যদেবতা গৃহা-রম্ভে চ তত্তদূহেনোল্লেখঃ। ততো নবগ্রহান্ সংপূজ্য অদ্যেত্যাদি বাস্তুযাগ কর্ম্মাভ্যুদয়ার্থং সগণাধিপ গৌর্য্যাদি ষোড়শমাতৃকা পূজা বসোর্ধারা সম্পাতনায়ুষ্য সূক্তমন্ত্রজপাভ্যুদয়িক শ্রাদ্ধান্যহং করিষ্যে ইতি সঙ্কল্প তানি বিধায় প্রকৃতং কর্ম্ম কুর্য্যাৎ। যথা প্রাঙ্মুখং ব্রাহ্মণত্রয়ং গন্ধাদিনা পরিতোষ্য ওঁ কর্ত্তব্যেঽস্মিন্ বাস্তুযাগকর্ম্মণি পুণ্যাহং ভবন্তোঽধি ব্রুবন্তু। ইতি শ্রাবয়েৎ। ৩৫৩
ওঁ পুণ্যাহমিতি ত্রিস্তৈরুক্তে। ওঁ কর্ত্তব্যেঽস্মিন্ বাস্তুযাগকর্ম্মণি ওঁ স্বস্তি ভবন্তোঽধিব্রুবন্তু। ইতি শ্রাবয়েৎ। ওঁ স্বস্তীতি ত্রিস্তৈরুক্তে। ওঁ কর্ত্তব্যেঽস্মিন্ বাস্তুযাগকর্ম্মণি ওঁ ঋদ্ধিং ভবন্তোঽধিব্রুবন্তু। ইতি শ্রাবয়েৎ। ওঁ. ঋদ্ধ্যতামিতি তে ত্রির্ব্ব-দেয়ুঃ। স্বয়ং করণে আচার্য্যমেব বৃণুয়াৎ। স্বয়মশক্তৌ ব্রাহ্মণত্রয়ং বৃণুয়াৎ। যথা প্রাঙ্মুখঃ উদঙ্মুখঃ ব্রাহ্মণত্রয়ং উপবেশ্য ওঁ সাধু ভাবানাস্তামিতি পুটাঞ্জলির্ব্বদেৎ। ওঁ সাধ্বহমাসে ইতি প্রতিবচনম্। অর্চ্চয়িষ্যামো ভবন্তং ইতি বদেৎ। ওঁ অর্চ্চয় ইতি প্রতিবচনম্। ততো গন্ধপুষ্পমাল্য. বস্ত্রাঙ্গুরীয়ক তাম্বূলাদিভিরভ্যর্চ্চ্য দক্ষিণং জানু স্পৃষ্ট্বা বদেৎ। অদ্যেত্যাদি মৎসংকল্পিত বাস্তুযাগকর্ম্মণি ব্রহ্মকর্ম্মকরণায় অমুক গোত্রং শ্রী অমুক দেবশর্ম্মাণং গন্ধাদিভিরভ্যর্চ্চ্য ভবন্তমহং বৃণে। ওঁ বৃতোঽস্মীতি

প্রতিবচনম্। যথাবিহিতং বাস্তুযাগকর্ম্ম কুরু। ইতি বদেৎ। ওঁ যথাজ্ঞানং করবাণীতি প্রতিবচনং। এবং হোত্রাদিকর্ম্ম
করণায়াচার্য্যকর্ম্মকরণায় সদস্যকর্ম্মকরণায় ইতি বিশেষঃ। ততঃ স্বয়ং বৃতো বা ব্রাহ্মণো গায়ত্র্যা গোমূত্রং, গন্ধদ্বারেতি
গোময়ং, আপ্যায়স্বেতি দুগ্ধং, দধিক্রাব্ণ ইতি দধি, তেজোসীতি ঘৃতং, দেবস্য ত্বা ইতি কুশোদকং, পৃথক্ পৃথক্ অভিমন্ত্র্য
সর্ব্বমেকীকৃত্য তেন পূর্ব্বকল্পিতাং ভূমিং গায়ত্র্যা প্রোক্ষ্য শরৎপক্কধান্যং মুদ্গগোধূমসর্ষপতিলযব মিশ্রিত জলৈরেকৈক মিশ্রিত
জলৈর্ব্বা পরিষেচয়েৎ। শরৎপক্কধান্যাভাবে হৈমন্তিকং গ্রাহ্যম্। ততঃ কর্ত্তব্যমণ্ডল চতুষ্কোণেষু ঐশানীতঃ খদিরশঙ্কুচতুষ্টয়ং
দ্বাদশাঙ্গুল পরিমিতং প্রত্যেকং গৃহীত্বা ওঁ বিশন্তু তে তলে নাগা লোকপালাশ্চ কামগাঃ। অস্মিন্ প্রসাদে তিষ্ঠন্তু আয়ু-
র্ব্বলকরাঃ সদা। ইতি মন্ত্রেণ ন্যসেৎ। তৎপার্শ্বেষু ওঁ অগ্নিভ্যোঽপ্যথ সর্পেভ্যো যে চান্যে তৎ সমাশ্রিতাঃ। তেভ্যো বলিং 
প্রযচ্ছামি পুণ্যমোদনমুত্তমম্। ইতি মন্ত্রেণ প্রত্যেকং মাসভক্তবলিমগ্ন্যাদিভ্যো দদ্যাৎ। মণ্ডলাভাবপক্ষেঽপি শঙ্কুবলী
কার্য্যৌ মন্ত্র প্রকাশ্যলাভায় এবং ভূতবলিরপি। ততঃ শঙ্কুচতুষ্টয়মধ্যে ডোরকপাতেন স্বর্ণশলাকয়া বাস্তুমণ্ডলং লিখেৎ।
তত ক্রমঃ। ঈশানকোণাদারভ্যাধোমুখ পতিত বাস্তুপুরুষশিরস্থানে ঈশং শুক্লং অর্দ্ধপদম্ ॥ ১ ॥ দদক্ষিণে পর্জ্জন্যং পীত-
মেকপদম্ ॥ ২ ॥ ততো জয়ন্তং ধূম্রং দ্বিপদম্ ॥ ৩ ॥ ততঃ শক্রং পীতমেকপদম্ ॥ ৪ ॥ ততো ভাস্করং রক্তমেকপদম্ ॥ ৫ ॥
ততঃ সত্যং শুক্লং দ্বিপদম্ ॥ ৬ ॥ ততো ভৃশমেকপদং শুক্লম্ ॥ ৭ ॥ ততো ব্যোম কৃষ্ণমর্দ্ধপদম্ ॥ ৮ ॥ মণ্ডল দক্ষিণভাগে
কোণে হুতাশনং রক্তমর্দ্ধপদম্ ॥ ৯ ॥ তদধঃপদে পুষাণং রক্তমেকপদম্ ॥ ১০ ॥ ততো বিতথং কৃষ্ণং দ্বিপদম্ ॥ ১১ ॥ ততো

গৃহক্ষতং শ্বেতমেকপদম্ ॥ ১২ ॥ ততো যমং কৃষ্ণমেকপদম্ ॥ ১৩ ॥ ততো গন্ধর্ব্বং পীতং দ্বিপদম্ ॥ ১৪ ॥ ততো ভৃঙ্গং শ্যামমেকপদম্ ॥ ১৫ ॥ ততো মৃগং পীতমর্দ্ধপদম্ ॥ ১৬ ॥ মণ্ডলপশ্চিমভাগে পিতৄন্ শ্বেতানর্দ্ধপদান্ ॥ ১৭ ॥ তদুত্তরপদে দৌবারিকং শ্বেতমেকপদম্ ॥ ১৮ ॥ তদুত্তরঃ সুগ্রীবং কৃষ্ণং দ্বিপদম্ ॥ ১৯ ॥ ততঃ পুষ্পদন্তং পীতমেকপদম্ ॥ ২০ ॥ ততো বরুণং শ্বেতমেকপদম্ ॥ ২১ ॥ ততো হসুরং কৃষ্ণং দ্বিপদম্ ॥ ২২ ॥ ততঃ শোষং কর্বূরমেকপদম্ ॥ ২৩ ॥ ততঃ পাশং শ্যামমর্দ্ধপদম্ ॥ ২৪ ॥ মণ্ডলোত্তরভাগে রোগং শ্যামমর্দ্ধপদম্ ॥ ২৫ ॥ পূর্ব্বে নাগং রক্তমেকপদম্ ॥ ২৬ ॥ ততো বিশ্বকর্ম্মাণং পীতং দ্বিপদম্ ॥ ২৭ ॥ ততো ভল্লাতটং পীতমেকপদম্ ॥ ২৮ ॥ ততো যজ্ঞেশ্বরং শুক্লমেকপদম্ ॥ ২৯ ॥ ততো নাগরাজং শ্বেতং দ্বিপদম্ ॥ ৩০ ॥ ততঃ শ্রিয়ং পীতামেকপদাম্ ॥ ৩১ ॥ ততোঽদিতিং কৃষ্ণামর্দ্ধপদাম্ ॥ ৩২ ॥ পর্জ্জন্যপদাদধঃ পদে আপং শুক্লমেকপদম্ ॥ ৩৩ ॥ তস্যাধঃপদে আপবৎসং পীতমেকপদম্ ॥ ৩৪ ॥ পূর্ব্বস্যামর্য্যমাণং রক্তং চতুষ্পদম্ ॥ ৩৫ ॥ ভৃশপদাদধঃপদে সাবিত্রং রক্তমেকপদং ॥ ৩৬ ॥ তদধঃপদে সাবিত্রীং শুক্লামেকপদাম্ ॥ ৩৭ ॥ দক্ষিণস্যাং বিবস্বন্তং কৃষ্ণং চতুষ্পদম্ ॥ ৩৮ ॥ দৌবারিকপদাদূর্দ্ধপদে ইন্দ্রং পীতমেকপদং ॥ ৩৯ ॥ তদূর্দ্ধপদে জয়ং পীতমেকপদং ॥ ৪০ ॥ পশ্চিমায়াং মিত্রং রক্তং চতুষ্পদং ॥ ৪১ ॥ শেষপদাদূর্দ্ধপদে রুদ্রং শুক্লমেকপদং ॥ ৪২ ॥ তদূর্দ্ধপদে রাজযক্ষ্মাণং পীতমেকপদম্ ॥ ৪৩ ॥ উত্তরস্যাং ধরাধরং পীতং চতুষ্পদম্ ॥ ৪৪ ॥ মধ্যে ব্রহ্মাণং রক্তং চতুষ্পদং ॥ ৪৫ ॥ এবং মণ্ডলাদ্বহিঃ কোণচতুষ্টয়ে কলস চতুষ্টয়ং বস্ত্রমাল্যালঙ্কৃতং স্থাপয়েৎ। মণ্ডলাদ্বহিঃ পূর্ব্বস্যাং সূর্য্যপূর্ব্বে স্কন্দং পীতং ॥ ৪৬ ॥ আগ্নেয্যাং কলসসমীপে বিদারীং

কৃষ্ণাং ॥ ৪৭ ॥ দক্ষিণস্যাং রক্তমর্য্যমণং ॥ ৪৮ ॥ নৈর্ঋত্যাং কলসসমীপে কৃষ্ণাং পূতনাং ॥ ৪৯ ॥ পশ্চিমায়াং জম্ভকং কৃষ্ণং ॥ ৫০ ॥ বায়ব্যাং কলসসমীপে পাপরাক্ষসীং কৃষ্ণাং ॥ ৫১ ॥ উত্তরস্যাং পিলিপিঞ্জং কৃষ্ণং ॥ ৫২ ॥ ঐশান্যাং কলসসমীপে চরকীং কৃষ্ণাং ॥ ৫৩ ॥ ততো যজ্ঞভূমিবহিঃ পূর্ব্বাদিদিক্ষু মাষভক্তবলির্দেয়ঃ। তত্র মন্ত্রঃ। ওঁ ভূতানি রাক্ষসা বাপি যেঽত্র তিষ্ঠন্তি কেচন। তে গৃহ্নন্তু বলিং সর্ব্বে বাস্তুং গৃহ্ন্যামহং পুনঃ। ততঃ সপুষ্পাক্ষতেন ঈশ ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইত্যাবাহ্য এতৎ পাদ্যং ওঁ ঈশানায় নমঃ। ইতি ক্রমেণ নৈবেদ্যান্তং সংপূজ্য পুষ্পাঞ্জলিত্রয়ং দদ্যাৎ। মণ্ডলকরণাসামর্থ্যে শালগ্রামে জলে বা বিনাবাহনবিসর্জ্জনে পাদ্যাদিভিঃ পূজয়েৎ। অভাবে গন্ধপুষ্পাভ্যাং। এবং পর্জ্জন্যায় জয়ন্তায় শক্রায় ভাস্করায় সত্যায় ভৃষায় ব্যোম্নে অগ্নয়ে পূষ্ণে বিতথায় গৃহক্ষতায় যমায় গন্ধর্ব্বায় ভৃঙ্গায় মৃগায় পিতৃভ্যঃ দৌবারিকায় সুগ্রীবায় পুষ্পদন্তায় বরুণায় অসুরায় শেষায় পাপায় রোগায় নাগায় বিশ্বকর্ম্মণে ভল্লাতটায় যজ্ঞেশ্বরায় নাগরাজায় মিত্রায় রুদ্রায় রাজযক্ষ্মণে ধরাধরায় ব্রহ্মণে স্কন্দায় বিদার্য্যৈ অর্য্যম্নে পূতনায়ৈ জম্ভকায় পাপরাক্ষস্যৈ পিলিপিঞ্জায় চরক্যৈ। এবং ক্রমেণ এতান্ পূজয়েৎ। ব্রহ্মস্থানে বাসুদেবমাবাহ্য গন্ধপুষ্পাভ্যাং সংপূজ্য লক্ষ্মীং গন্ধপুষ্পাভ্যাং পূজয়েৎ। ততঃ ওঁ বাসুদেবগণেভ্যো নমঃ। ইতি গন্ধাদিভিঃ পূজয়েৎ। ততঃ রাজতী পৃথিবীং ওঁ সুরূপাং প্রমদারূপাং দিব্যাভরণ ভূষিতাং। ধ্যাত্বা তামর্চ্চয়ে দেবীং পরিতুষ্টাং স্মিতাননাম্। ইতি ধ্যাত্বাবাহ্য ওঁ পৃথিব্যৈ নমঃ ইত্যনেন ষোড়শোপচারৈঃ সংপূজ্য সর্ব্বদেবময়ং হরিং ধ্যাত্বাবাহ্য ওঁ হরয়ে নমঃ। ইতি গন্ধাদিভিঃ সংপূজ্য বাস্তুপুরুষমাবাহ্য ওঁ বাস্তোষ্পতয়ে নমঃ। ইতি

গন্ধাদিভিঃ সংপূজয়েৎ। ততো মণ্ডল মধ্যে চতুষ্পদে ব্রহ্মস্থানে অক্ষতান্দত্ত্বা তদুপরি বর্দ্ধন্যা সহ কুম্ভং জলপূরিতং নবং দৃঢ়ং সুবর্ণরজতান্বিতং সর্ব্ববীজৌষধিযুক্তং সংস্থাপ্য তস্মিংশ্চ চতুর্ম্মুখ দেবমাবাহ্য ওঁ ব্রহ্মণে নমঃ। ইত্যনেন ষোড়শোপ-চারেণ পূজয়েৎ। ততঃ কুম্ভস্য ঈশানকোণে দধ্যক্ষতবিভূষিতং চূতাশ্বত্থবটপ্লক্ষোডুম্বরপল্লবসংছন্নমুখং ফলপুষ্পযু গাচ্ছাদিতমন্তঃ প্রক্ষিপ্তপঞ্চরত্নং নির্ম্মলজলপূর্ণ কলসমক্ষতানামুপরি ওঁ আজিঘ্র কলসং মহ্যা ত্বা বিশন্ত্বিন্দবঃ পুনরূর্জ্জা নিবর্ত্তস্ব সা ন সহস্রং ধুক্ষোরুধারাং পয়স্বতী পুনর্মা বিশতাদ্রয়িঃ। ইত্যনেন সংস্থাপ্য ওঁ বরুণস্যোত্তম্ভনমসি বরুণস্য স্কম্ভঃ সর্জ্জনীস্থঃ বরুণস্য ঋত সদন্যসি বরুণস্যঋত সদনমসি বরুণস্য সদনীমাসীদ ইতি মন্ত্রেণ বরুণং ন্যসেৎ। ওঁ গঙ্গাদ্যাঃ সরিতঃ সর্ব্বাঃ সরাংসি চ নদা হ্রদাঃ। আয়ান্তু যজমানস্য দুরিতক্ষয়কারকাঃ। ইতি তীর্থানি তত্র বিন্যস্য অশ্বস্থান গজস্থান বল্মীকনদীসঙ্গমহ্রদগোকুলরথ্যাভ্য আহৃত্য সপ্ত-মৃদঃ সর্ব্বৌষধীশ্চ ক্ষিপেৎ। ততো মণ্ডলপশ্চিমদিশি তাদৃক্‌কুণ্ডে হস্তপরিমিত স্থণ্ডিলে বা হোমং কুর্য্যাৎ। তত্র যজমানো যজমানবৃতব্রাহ্মণো বা বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতকর্ম্মারম্ভে প্রথমং পিঙ্গভ্রূশ্মশ্রুকেশাক্ষঃ পীনাঙ্গজঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ সপ্তার্চ্চিঃ শক্তিধারক ইত্যাদিত্যপুরাণীয়ং ধ্যাত্বা অগ্নে ত্বং প্রজাপতিনামাসীতি নাম কৃত্বাবাহ্য পূজয়েৎ। ততঃ প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তুষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা।—প্রজাপতির্ঋষির্গায়ত্রী-চ্ছন্দো ঽগ্নির্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ইতি

শ্রুবেণাজ্যাহুতিত্রয়ং দত্ত্বা প্রকৃতং কর্ম্ম কুর্য্যাৎ। যথা ঘৃতাক্তমধুমিশ্রিত তিলযবৈঃ সমিদ্ভির্ব্বা পূজিতত্রিপঞ্চাশদ্দেবতাভ্যঃ প্রত্যেকং দশাহুতীর্জুহুয়াৎ। তত্র ক্রমঃ। ওঁ ঈশানায় স্বাহা। এবং পর্জ্জন্যায় জয়ন্তায় শক্রায় ভাস্করায় সত্যায় ভৃশায় ব্যোম্নে অগ্নয়ে পূষ্ণে বিতথায় গৃহক্ষতায় যমায় গন্ধর্ব্বায় ভৃঙ্গায় মৃগায় পিতৃভ্যঃ দৌবারিকায় সুগ্রীবায় পুষ্পদন্তায় বরুণায় অসুরায় শেষায় পাপায় রোগায় নাগায় বিশ্বকর্ম্মণে ভল্লাভটায় যজ্ঞেশ্বরায় নাগরাজায় শ্রিয়ৈ আদিত্যৈ আপায় আপবৎসায় অর্য্যম্নে সাবিত্রায় সাবিত্র্যৈ বিবস্বতে ইন্দ্রায় জয়ায় মিত্রায় রুদ্রায় রাজযক্ষ্মণে ধরাধরায় ব্রহ্মণে স্কন্দায় বিদার্য্যৈ অর্য্যম্নে পূতনায়ৈ জম্ভকায় পাপরাক্ষস্যৈ পিলিপিঞ্জায় চরক্যৈ ॥ ৫৩ ॥ ততো ব্রহ্মণ আহুতিশতেন হোমঃ। ততো বাসুদেবায় লক্ষ্ম্যৈ বাসুদেবগণেভ্যঃ ধরায়ৈ হরয়ে চতুর্ম্মুখায় ইতি প্রত্যেকমেকৈকাহুতিং জুহুয়াৎ। ততো বাস্তোষ্পতে ইতি ঋক্পঞ্চস্য বিশ্বামিত্রঋষিরতিজগতীচ্ছন্দো বাস্তুর্দেবতা বাস্তুপ্রীতয়ে বিনিয়োগঃ। ইতি ঋষ্যাদি স্মৃত্বা মধুঘৃতাক্তবিল্বপঞ্চকং তদভাবে তদ্বীজ পঞ্চকং একৈকফলেন তদ্বীজেন বা সকৃৎ জুহুয়াৎ। যথা।—বাস্তোষ্পতে প্রতিজানীহি প্রতিজানীহি অস্মান্ সুরেশো হনমীবো ভবানঃ। যত্তেমহে প্রতিতন্নো জুষস্ব শন্নো ভব দ্বিপদেশং চতুষ্পদে স্বাহা ॥ ১ ॥ ওঁ বাস্তোষ্পতয়ে ইতি দেবতোদ্দেশঃ সামগেতরেষাম্। ওঁ বাস্তোষ্পতে প্রতরণো ন এধি গায়স্ফানোগোভিরশ্বোভিরিন্দো। অজরাসস্তে সখ্যে শ্যাম পিতেব প্রতিতন্নো জুষস্ব স্বাহা ॥ ২ ॥ ওঁ বাস্তোষ্পতে সময়াসংদদাতে সংক্ষীমহি হিরণ্ময় গোভূম্যা পাহি ক্ষেম উৎযাগে বরন্নো যূয়ং পাতস্বস্তিভিঃ সদা নঃ স্বাহা ॥ ৩ ॥ ওঁ বাস্তোষ্পতে অমীবিতা বিশ্বারূপাণ্যাবিশন্ সখাসুষেব এধি নঃ স্বাহা ॥ ৪ ॥ ওঁ বাস্তো-

ন্সতে ধ্রুবাস্থূলাং সত্রং সৌম্যান্যাং দ্রপ্সোপুরাং ভেত্ত্বা শাশ্বতীনামিন্দ্রো মুনীনাং সখা স্বাহা ॥ ৫ ॥ ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা ইতি জুহুয়াৎ। ততঃ শাট্যায়নহোমাদি ব্রহ্মদক্ষিণান্তমুদীচ্যং কর্ম্ম সমাপ্যাগ্নিং বিসৃজেৎ। স্মার্ত্তভট্টনারায়ণমতে মহাব্যাহৃতিভিস্তিসৃভিঃ প্রায়শ্চিত্তহোমঃ। শাট্যায়নহোমে নবগ্রহহোমে প্রমাণং নাস্তি। ততঃ সর্ব্ববেদি সাধারণং বাস্তুদেবতাভ্যঃ পায়স বলিদানাদি কর্ম্ম কুর্য্যাৎ। যথা স্থানান্তরে পূর্ব্বকৃত পায়সেন এষ পায়সবলিঃ ওঁ ঈশানায় নমঃ। ইতি ক্রমেণ প্রণবাদিনমোহন্তেন পূজিত চরক্যন্তদেবতাভ্যঃ প্রত্যেকং বলিন্দদ্যাৎ। ততঃ পুনঃ পুণ্যাহং স্বস্তি ঋদ্ধিঞ্চ বাচয়েৎ। তত আচার্য্যঃ প্রাঙ্মুখং পুত্রাদিসহিতং যজমানং অগ্নেরুত্তরদেশে পূর্ব্বস্থাপিত শান্তিকলসজলেনাভিষিঞ্চেৎ। তত্র মন্ত্রাঃ ওঁ সুরাস্ত্বামভিষিঞ্চন্তু ব্রহ্মাবিষ্ণুমহেশ্বরাঃ। বাসুদেবো জগন্নাথস্তথা সঙ্কর্ষণো বিভুঃ। প্রদ্যুম্নশ্চানিরুদ্ধশ্চ ভবন্তু বিজয়ায় তে। আখণ্ডলোঽগ্নির্ভগবান্ যমো বৈ নৈর্ঋতস্তথা। বরুণঃ পবনশ্চৈব ধনাধ্যক্ষস্তথা শিবঃ। ব্রহ্মণাসহিতঃ শেষো দিক্‌পালাঃ পান্তু তে সদা। কীর্ত্তির্লক্ষ্মী ধৃতির্মেধা পুষ্টিঃ শ্রদ্ধা দয়া মতিঃ। বুদ্ধির্লজ্জা বপুঃশান্তিস্তুষ্টিঃ কান্তিশ্চ মাতরঃ। এতাস্ত্বামভিষিঞ্চন্তু দেবপত্ন্যঃ সমাগতাঃ। আদিত্যশ্চন্দ্রমা ভৌমোবুধজীবসিতার্কজাঃ। গ্রহাস্ত্বামভিষিঞ্চন্তু রাহুঃ কেতুশ্চ তর্পিতাঃ। দেবদানবগন্ধর্ব্বা যক্ষরাক্ষসপন্নগাঃ। ঋষয়ো মুনয়ো গাবো দেবমাতর এব চ। দেবপত্ন্যা ধ্বরা নাগা দৈত্যাশ্চাপ্সরসাংগণাঃ। অস্ত্রাণি সর্ব্বশাস্ত্রাণি রাজানো বাহনানি চ। ঔষধানি চ রত্নানি কালস্যাবয়বাশ্চ যে। সরিতঃ সাগরাঃ শৈলাস্তীর্থানি জলদা হ্রদাঃ। এতে ত্বামভিষিঞ্চন্তু সর্ব্বকামার্থ সিদ্ধয়ে। ততঃ পুনরপি পুণ্যাহং স্বস্তি ঋদ্ধিঞ্চ বাচয়িত্বা সনালকর্ক্করীং গৃহীত্বা অভ্র মার্গেণ তোয়ধারাং দত্ত্বা গর্ত্ত ৫৫৭

মধ্যে আকাশপদে হস্তমাত্রমধশ্চতুরঙ্গুলং খনেৎ। তং খাতং গোময়েনোপলিপ্য চন্দনেন বিভূষয়েৎ। গর্ত্তমধ্যে শুক্লপুষ্পা-
ক্ষতান্নিক্ষিপেৎ। ততঃ আচার্য্যঃ প্রাঙ্মুখশ্চতুর্ম্মুখং দেবং ধ্যাত্বা তূর্য্যমঙ্গল ব্রহ্মঘোষৈর্ব্বহ্মস্থাপনাৎ কুম্ভমানীয় জানুভ্যাং
ধরণীং স্পৃষ্ট্বা যজমানঃ, আয়াহি ভগবন্দেব তোয়পূর্ণ জলেশ্বর। গৃহাণার্ঘ্যং ময়া দত্তং পরিতোষায় তে নমঃ। ওঁ নমো
বরুণায় ইতি ঘটবর্জ্জ্যার্ঘ্যং দদ্যাৎ। ততঃ শর্করীং গৃহীত্বা জলেনাপূর্য্য ওমিতি স্মরন্ তত্র শুক্লপুষ্পাণি নিঃক্ষিপেৎ। দক্ষিণা-
বর্ত্তে জলে শুভং বামাবর্ত্তে অশুভম্। তত ইষ্টকাং গৃহীত্বা ওঁ ইষ্টকে ত্বং প্রযচ্ছেষ্টং প্রতিষ্ঠাং কারয়াম্যহম্। দেশস্বামি
পুরস্বামি গৃহস্বামি পরিগ্রহে। মনুষ্যধনহস্ত্যশ্বপশুবৃদ্ধিকরী ভব। ওঁ যথাচলো গিরির্ম্মেরুর্হিমবাংশ্চ যথাচলঃ। তথা ত্বম-
চলা ভূত্বা তিষ্ঠ চাত্র শুভালয়ে। ইতি পঠিত্বা সংস্থাপ্য তৎখাতে পঞ্চরত্নং দধ্যোদনঞ্চ নিঃক্ষিপ্য শালিযবাদিবীজৈঃ শুক্ল-
মৃত্তিকয়া চ তং খাতং পূরয়েৎ। ততঃ ওঁ যান্তু দেবগণাঃ সর্ব্বে পূজামাদায় যাজ্ঞিকাঃ। ইষ্টকামপ্রসিদ্ধ্যর্থং পুনরাগমনায় চ।
ওঁ ক্ষমস্ব ইত্যুক্ত্বাচার্য্যস্তান্ দেবগণান্ বিসৃজ্য শান্তিং কূর্য্যাৎ। মুখ্যচান্দ্রেণ ওমদ্যেত্যাদি কৃতৈতদ্বাস্তুযাগকর্ম্মণঃ প্রতিষ্ঠার্থং
দক্ষিণামিদং কাঞ্চনং শ্রী বিষ্ণুদৈবতং অমুক গোত্রায় শ্রী অমুক দেবশর্ম্মণে ব্রাহ্মণায়াচার্য্যায় তুভ্যমহং দদে। ওঁ স্বস্তীতি প্রতি
বচনম্। তত্র মিলিতামিলিত দক্ষিণা দানাৎ ফলতারতম্যম্। ততোঽচ্ছিদ্রাবধারণঞ্চ কৃত্বা সর্ব্বৌষধিজলেন যজমানং স্নাপ-
য়েৎ। ততো দৈবজ্ঞপতীন্ পরিতোষ্য ব্রাহ্মণাদীন্ শক্তিতোঽর্চ্চয়িত্বা নৃত্যাদীন্ কারয়েৎ। ততঃ প্রাসাদং জলাশয়ং বা কার-
য়েৎ। ইদানীং বাস্তুমণ্ডলকরণাশক্তৌ বাস্তুদেবতা যথাশক্তি গন্ধাদিভিঃ শালগ্রামে ঘটস্থজলে বা নিরাবাহন বিসর্জ্জনে পূজয়েৎ।

যথা ওঁ ঈশানায় নম ইত্যাদি ওঁ চরক্যৈ নম ইত্যন্তং পূজানামোক্ত বিধিনা পূজয়েৎ। একাশীতিপদং বাস্তৌ তু বিশেষো বাস্তুযাগ প্রয়োগে পশ্চাদনুসন্ধেয়ঃ কিন্তু তত্র শিখিভূতিক্রমঃ। যথা শিরসি শিখি রক্তমেকপদম্ ॥ ১ ॥ দক্ষিণনেত্রে পর্জ্জন্যং পীতমেকপদম্ ॥ ২ ॥ দক্ষিণশ্রোত্রে জয়ন্তং শুক্লং দ্বিপদম্ ॥ ৩ ॥ দক্ষিণাংশে কুলিশায়ুধং পীতং দ্বিপদম্ ॥ ৪ ॥ দক্ষিণবাহু-মূলে সূর্য্যং রক্তং দ্বিপদম্ ॥ ৫ ॥ কূর্পরে সত্যং শ্বেতং দ্বিপদম্ ॥ ৬ ॥ মণিবন্ধে ভৃশং পীতং দ্বিপদম্ ॥ ৭ ॥ অঙ্গুলিমূলে আকাশং শুক্লমেকপদম্ ॥ ৮ ॥ দক্ষিণাঙ্গুল্যগ্রে হুতাশনং ধূম্রমেকপদম্ ॥ ৯ ॥ বামনেত্রে দিতিং শ্যামামেকপদম্ ॥ ১০ ॥ মুখে আপং শ্বেতমেকপদম্ ॥ ১১ ॥ দক্ষিণহস্তে সাবিত্রং রক্তমেকপদম্ ॥ ১২ ॥ দক্ষিণ মণিবন্ধে পূষাণং রক্তমেকপদম্ ॥ ১৩ ॥ বামশ্রোত্রে অদিতিং রক্তাং দ্বিপদম্ ॥ ১৪ ॥ বক্ষঃস্থলে আপবৎসং গৌরমেকপদম্ ॥ ১৫ ॥ দক্ষিণহস্ততলেঽর্য্যমণং পাণ্ডুরং ত্রিপদম্ ॥ ১৬ ॥ দক্ষিণহস্তে সবিতারং গৌরমেকপদম্ ॥ ১৭ ॥ দক্ষিণপার্শ্বে বিতথং শ্যামং দ্বিপদম্ ॥ ১৮ ॥ বামাংশে সর্পং কৃষ্ণং দ্বিপদম ॥ ১৯ ॥ তদধঃ বামবাহুমূলে সোমং শুক্লং দ্বিপদম্ ॥ ২০ ॥ তদধ বামকূর্পরে ভল্লাটং গৌরং দ্বিপদম্ ॥ ২১ ॥ তদধঃ বামমণিবন্ধে মুখ্যং রক্তং দ্বিপদম্ ॥ ২২ ॥ তদধঃ আদ্যপাদে বামহস্তাঙ্গুলিমূলে মিত্রং গৌরমেকপদম্ ॥ ২৩ ॥ দ্বিতীয় পদে বামহস্তে রক্তং রক্তমেকপদম্ ॥ ২৪ ॥ তদধঃ আদ্যপাদে বামহস্তাঙ্গুল্যগ্রে রোগং ধূম্রমেকপদম্ ॥ ২৫ ॥ দ্বিতীয়পদে পাপং কৃষ্ণমেকপদম্ ॥ ২৬ ॥ তদ্দক্ষিণে বামপার্শ্বে শোষং কৃষ্ণং দ্বিপদম্ ॥ ২৭ ॥ তদ্দক্ষিণে বামপার্শ্বেঽসুরং রক্তং দ্বিপদম্ ॥ ২৮ ॥ তদ্দক্ষিণে বামোরৌ বরুণং শ্বেতং দ্বিপদং ॥ ২৯ ॥ তদ্দক্ষিণে বামজানুনি পুষ্পদন্তং রক্তং দ্বিপদম্ ॥ ৩০ ॥ তদ্দক্ষিণে বাম- ৫৬১